


THE
CHOWKHAMBÂ SANSKRIT SERIES
A
COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS
NO. 408.

मीमांसाकौस्तुभः ॥

(मीमांसासूत्रोपरि काचन विस्तृता टीका)
(द्वितीयाध्यायस्य प्रथमाद्वितीयौ पादौ ।)
पूर्वोत्तरमीमांसापारावारपारीण–
श्रीखण्डदेवविरचितः
श्रीकाशीहिन्दूविश्वविद्यालयप्रधानमीमांसाध्यापकेन
वेदविशारदबिरुदभाजा
पं० अ. चिन्नस्वामिशास्त्रिणा
तच्छिष्येण श्रीपट्टाभिरामशर्मणा मीमांसाशास्त्रिणा च
संशोधितः श्रीजयकृष्णदासगुप्तेन मुद्रापितो विजयताम् ।

MIMAMSAKAUSTUBHA

[An exhaustive Commentary of Jaiminisutras]
(I and II Pada of II Adhyaya)

BY

KHANDADEVA.

Edited by
"Veda Visarada" Pandit A. Chinnaswami Sastri,
Chief Professor of Mimamsa, Benares Hindu University
and his pupil Sri Pattabhirama Sarma M. S.
Vol. III. FASCICULUS III–३.

PUBLISHED & SOLD BY THE SECRETARY,
CHOWKHAMBA SANSKRIT SERIES OFFICE,
Benares City.

1932




श्रीः

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ।
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ।
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तबकः—४०८

Printed by Jai Krishna Das Gupta
at the Vidya Vilas Press, Benares.

(पूर्वपक्षः)

तत्र यद्यपि विषयतासम्बन्धेन गुणगुणिनोरुभयोरपि सम्बन्धकीर्तनाख्यस्तोत्रशस्त्रं प्रति करणत्वमस्ति, तथाऽपि प्रयोजनापेक्षायां दृष्टविधया कर्मानुपयुक्तगुणप्रकाशनार्थत्वायोगेऽपि कर्मोपयुक्तगुणिस्मरणार्थत्वसंभवेऽदृष्टार्थत्वकल्पनानुपपत्तेर्गुणिस्मरणरूपसंस्कारार्थत्वमेव याज्यादिमन्त्रवत्स्तोत्रशस्त्रमन्त्राणामङ्गीकर्तव्यम् । न चाऽत्र स्तौतिशंसतिभ्यां विनियोगेन याज्यादिवैलक्षण्यात्स्तौतिशंसत्योश्च गुणविशेष्यकगुणिसम्बन्धकीर्तनवाचित्वस्य लोके प्रसिद्धत्वाद्गुणिप्रकाशनार्थत्वे च तस्यैव विशेष्यत्वेन तयोर्लक्षणापात्तिरिति वाच्यम् । 'प्रयाजशेषेण हवींष्यभिघारयती'तिवद्दृष्टार्थत्वानुरोधेन लक्षणाङ्गीकारस्य न्याय्यत्वात्। अतस्सन्निपत्योपकारकत्वमेव स्तोत्रशस्त्रयोरपि । सूत्रं निगदव्याख्यातम् ॥ १३ ॥

अर्थेन त्वपकृष्येत देवतानामचोदनार्थस्य गुणभूतत्वात् ॥ २-१-१४ ॥

(सिद्धान्तः)

अस्तु तावन्मूलयुक्तिभूतः श्रुतिविरोधो लिङ्गस्य बाधकः । अभ्युच्चययुक्तिरूपो दुर्बलप्रमाणबाधप्रसङ्ग एव तावदादावभिधीयते । यदि हि स्तौतिशंसत्योः प्रकाशनलक्षणार्थतामङ्गीकृत्य तन्मन्त्राणां गुणिस्मरणार्थत्वमिष्यते, ततो महेन्द्रदेवताकयागाभ्यासक्रमे पठितयोरैन्द्रमन्त्रयोर्महेन्द्रप्रकाशनाशक्तेरिन्द्रस्य च यागानङ्गत्वेन प्रकाशनानर्हत्वात्प्रकरण एव यत्रेन्द्रो देवता तत्रोत्कृष्येत पूषानुमन्त्रणमन्त्रवत् । ततश्च यजुर्वेदविहितग्रहयागाभ्या-

सक्रमेण सामवेदान्तर्गतोत्तराग्रन्थपठितानामृचां यथाक्रमं पाठेनाऽवगताङ्गभावानां मध्ये ऐन्द्रमन्त्रयोस्तदनङ्गीकारात्क्रमबाधापत्तिः । 'पादं पुनरारभत'इति वचनावगतस्य चाऽऽद्यामृचं सकृत्पठित्वा तस्यामन्त्यपादेन सह द्वितीयाद्यर्धर्चं पठित्वा, तदन्त्यपादेन सह द्वितीयान्त्यार्धर्चपठनरूपस्य प्रग्रथनस्य माहेन्द्रग्रहसन्निधावाम्नातस्य तदङ्गत्वानङ्गीकारात्सन्निधिबाधश्च । अतश्च दुर्बलयोरपि क्रमसन्निध्योः प्रबलेनाऽपि लिङ्गेन सहाऽबाधेनैवोपपत्तौ बाधायोगान्न सन्निपत्योपकारकत्वं स्तोत्रशस्त्राणाम् ।

सूत्रं तु—देवतापदं प्रति गुणत्वेन संयुक्ता यदि स्तुतिर्भावना, ततः अर्थेन प्रयोजनानुरोधेन माहेन्द्रग्रहयाजितः अपकृष्येत ऐन्द्री स्तुतिः, तस्याः प्रयोजनभूतां देवतां प्रति गुणभूतत्वादिति व्याख्येयम् ॥ १४ ॥

वशावद्वा गुणार्थं स्यात् ॥ २-१-१५ ॥

नाऽपकृष्येतैन्द्री स्तुतिः, इन्द्रशब्देनैव प्रकृतग्रहयागीयेन्द्रप्रकाशनोपपत्तेः । यद्यपि च तत्र महत्त्वगुणविशिष्टस्यैवेन्द्रस्य माहेन्द्रमिति तद्धितेन देवतात्वमुक्तम्,तथाऽपि विशेष्यस्यैव मन्त्रेण प्रकाशनोपपत्तेः, विशेषणांशस्य च मन्त्राभावेऽपि ध्यानाद्युपायान्तरेण स्मृतिसिद्धेर्नाऽपकर्षापत्तिः। न हि (१)'सा वा एषा सर्वदेवत्या यदजा वशा वायव्यामालभेते'ति वाक्येन वशात्वगुणविधानेऽपि विशेष्यमात्रस्य (२)'छागस्य वपायामेदस' इति मन्त्रेणाऽभिधानं नेष्टम् । न ह्यत्र महेन्द्रशब्दस्यैव देवतात्वम्, येनेन्द्रशब्दस्य ततो भिन्नत्वेनाऽपकर्षशङ्क्येत । तथा सति महे-

---

१. तै. सं. ३. ४. ३. २. तै. ब्रा. ३. ६. ८.

न्द्रशब्दस्याऽर्थवत्त्वाभावेन प्रातिपदिकसंज्ञाभावात्तद्धितानुत्पत्तिप्रसङ्गात् । अत एव चेतनाचेतनसाधारण्येनाऽर्थस्यैव देवतात्वं (१)दशमे वक्ष्यते । एवं सत्यपि यदि महेन्द्रशब्दो रूढ्या अर्थान्तरवचनस्यात्ततोऽर्थान्तरवचनेनेन्द्रशब्देन नाऽभिधीयते तदर्थ इत्युत्कृष्येतैन्द्रो मन्त्रः, प्रोक्षणीशब्दवत्तु क्लृप्तावयवयोगेनोपपत्तौ नाऽर्थान्तरवाचित्वकल्पनायां प्रमाणमस्ति ।

ननु तद्धितसमासरूपवृत्तिद्वयानुपपत्तिरेव रूढिकल्पनायां प्रमाणं भविष्यति । तथा हि—न तावदेकस्यैवेन्द्रशब्दस्य युगपत्तद्धितसमासरूपवृत्तिद्वयसम्भवः, अन्यतरसापेक्षत्वेनैकस्या अपि वृत्तेरनुपपत्तेः समासवृत्त्यर्थमिन्द्रशब्दस्य सुबन्तत्वकल्पना, तद्धितवृत्त्यर्थं वाऽसुबन्तत्वमिति युगपद्वृत्तौ युगपत्सुबन्तत्वासुबन्तत्वविरोधापत्तेश्च । नाऽपि क्रमेण, सकृच्छ्रुतस्येन्द्रशब्दस्याऽऽवृत्त्यापत्तेः । तद्धितपूर्ववृत्तौ महेन्द्रमित्युत्तरपदवृद्धिर्महत्त्वस्य प्रधानभूतद्रव्यविशेषणत्वं चाऽधिकं प्रसज्येत । अतो वृत्तिद्वयानुपपत्त्या अश्वकर्णादिशब्दवद्रूढिकल्पनोपपत्तेरिन्द्रान्महेन्द्रस्य भेदावगमादिन्द्रशब्देन च प्रकाशनानुपपत्तेरुत्कर्षानिवारणमिति चेत्, समासवृत्त्युत्तरकाले तद्धितवृत्त्यङ्गीकारात् ।

न चैवमिन्द्रपदावृत्तिः, वृत्तिद्वयविवरणवेलायां पौरुषेयेन्द्रपदावृत्तावपि वैदिकमाहेन्द्रपदेनाऽनावृत्तेनैव महत्त्वगुणविशिष्टेन्द्रदेवतात्वविध्युपपत्तेः । अत एव तद्धितवृत्तेः पूर्वं द्वन्द्वादिसमासाङ्गीकारात् "आग्नावैष्णव" मित्यादौ देवताद्वन्द्वादिनिमित्तकानङाद्युत्पत्तिराश्रयेणोपपादिता भविष्यति । अतश्च क्रमेण वृत्तिद्वयस्याऽप्युपपत्तेः प्रोक्षणीशब्दवत्क्लृप्तावयवयोगेनोपपत्तौ रूढिकल्पनानवकाशात्सत्यपि गुणविशिष्टस्येन्द्रस्य देव-

१. पू. मी. १०. ४. १३.

तात्वे वशावदिन्द्रशब्देन विशेष्यमात्रप्रकाशनोपपत्तेर्नोत्कर्षापत्तिः ।

वस्तुतस्तु महेन्द्रप्रातिपदिकेन महत्त्वाविशिष्टे इन्द्रे उक्तेऽपि राजपुरुषश्शोभन इतिवद्विशेष्यमात्रस्यैव तद्धितेन देवतात्वावगमाद्विशेषणस्य च महत्पदस्य विशेष्योपलक्षणार्थत्वेन स्तावकत्वेनोपपत्तेर्देवताभूतस्य शुद्धस्येन्द्रस्यैन्द्रेण(१) प्रकाशनोपपत्तौ नोत्कर्षापत्तिः ।

सूत्रं तु—अगुणार्थं स्यादित्यकारप्रश्लेषेण व्याख्येयम् ॥१५॥

न श्रुतिसमवायित्वात् ॥ २-१-१६ ॥

नेन्द्रशब्देन प्रकृतग्रहसम्बन्धिदेवताभिधानम्, प्रकृतग्रहे माहेन्द्रमिति तद्धितसहकृतेन विधिना महेन्द्रपदस्यैव देवतात्वविधानात् । तथा हि—तद्धितेन देवतात्वविशिष्टद्रव्याभिधानात् देवतात्वस्य च त्यज्यमानहविरुद्देश्यत्वेन द्रव्यव्यवहारे प्रसिद्धस्याऽनुच्चार्येऽर्थेऽसम्भवात् तद्धिताभिहितोद्देश्यत्वान्वयार्थं महेन्द्रप्रातिपदिकेन लक्षणया महेन्द्रपदमेवाऽभिधाय तस्य त्यज्यमानहविरुद्देश्यताख्यं देवतात्वं विधीयते। महेन्द्रशब्दे पदलक्षणायाश्च शक्यसम्बन्धं विनाऽनुपपत्तेर्महेन्द्रपदशक्यश्चेतनाचेतनसाधारण्येन दशमे वक्ष्यमाणोऽर्थोऽपि नाऽसङ्गतः । अतश्च महत्त्वगुणविशिष्टेन्द्रवाचकमहेन्द्रपदस्यैव देवतात्वावसायाद्विशिष्टवाचकबृहच्चक्रादिपदान्तरप्रयोगे सुतरां शुद्धेन्द्रपदप्रयोगान्नेन्द्रपदेन प्रकृतग्रहसम्बन्धिदेवताप्रकाशनोपपत्तिः ।

यत्तु—न्यायसुधाग्रन्थस्त्वारस्यात्प्रातिपदिकेनाऽर्थवाचिनाऽप्युद्देश्यात्वान्वयार्थं पदविशिष्टार्थलक्षणामङ्गीकृत्य तत्र तद्धितवाच्य-

---

१. प्रागाथेनाऽभिधानोपपत्ताविति. ख. पु.

देवतात्वान्वयाङ्गीकाराच्छब्दोपहितोऽर्थो देवतेति प्रतीयते, तत् पदविशिष्टेऽर्थे उच्चार्यत्वाख्योद्देश्यत्वस्य बाधाद्विशेषणीभूतपदान्वयस्य च 'अन्योपसर्जनमन्येन नाऽन्वेती'ति न्यायेनाऽव्युत्पन्नत्वादुपेक्षणीयम् ।

एतेनाऽर्थस्यैव देवतात्वेऽपि तस्य व्रीह्यादिवत्स्वरूपेण यागोपयोगाभावाच्छब्दोच्चारणद्वारेणैवोपयोगावगतेश्शब्दविशेषापेक्षायां लाघवादुपस्थितस्य विधिगतशब्दस्यैव नियम इति-पक्षोऽपि प्रत्युक्तः, तद्धितार्थस्य स्रज्यमानहविरुद्देश्यत्वाख्यस्याऽर्थे बाधेनाऽन्वयानुपपत्तेः । स्रज्यमानहविरुद्देश्यभूतशब्दाभिधेयत्वलक्षणा तु प्रधानभूते तद्धिते लक्षणापत्तेरयुक्तैव । तद्धरं प्रातिपदिक एव गुणभूते पदलक्षणेति । किञ्चैवं "अग्नये पावकाये" त्यादावेकस्यैव पदस्योच्चारणनियमोपपत्तेर्न पदद्वयोच्चारणापत्तिः । अतो महेन्द्रपदस्योच्चार्यत्वेन देवतात्वान्नेन्द्रमन्त्रेणाऽभिधानोपपत्तिः । अतश्चोत्कर्षापत्तिस्तदवस्थैव ।

सूत्रं तु --श्रुत्या विधिगतशब्देनैव देवतायाः कर्मणि समवायात् सम्बन्धादिन्द्रशब्देन महेन्द्रप्रकाशनानुपपत्तेर्नाऽनुत्कर्षसम्भव इति व्याख्येयम् ॥ १६ ॥

व्यपदेशभेदाच्च ॥ २-१-१७ ॥

इतश्च नेन्द्रपदेन महेन्द्राभिधानम् । अन्यथा साम्नाय्ये(१) "बहु दुग्धीन्द्राय देवेभ्यः, बहु दुग्धि महेन्द्राय देवेभ्य" इति द्वयोर्मन्त्रयोस्समाम्नातयोरन्योन्यप्रकाशकत्वे विकल्पापत्तेः । अस्मन्मते त्वैन्द्रेण मन्त्रेण साम्नाय्यगतेन्द्रप्रकाशनान्माहेन्द्रेण च

१. तै. ब्रा. ३. २. ३.

तद्वतमहेन्द्रप्रकाशनान्मन्त्रद्वयव्यपदेशव्यवस्थेति न विकल्पः। अतश्चेन्द्रमहेन्द्रयोरधिष्ठानैक्येऽपि विशेषणांशभेदादुद्देश्यशब्दभेदाच्च भेदावगमेनैन्द्रमन्त्रेणाऽभिधानानुपपत्तेरुत्कर्षानिवारणम् ॥१७॥

गुणश्चाऽनर्थकस्स्यात् ॥ २-१-१८ ॥

यदप्युक्तं महेन्द्रप्रातिपदिकेन महत्त्वविशिष्टे इन्द्रेऽभिहितेऽपि राजपुरुषश्शोभन इतिवद्विशेष्यमात्रस्यैव तद्धितार्थान्वय इति, तन्न; तथा सति गुणवाचिमहत्पदानर्थक्यप्रसङ्गात् । न हि तस्य राजपदवदर्थद्वारेणोपलक्षकता सम्भवति, देवतायास्स्वरूपेण कर्मण्यसम्बन्धात् । किन्तु शब्दोच्चारणद्वारा तदुपकारकत्वात् महत्पदस्याऽपि तद्द्वारैवोपलक्षकता वाच्या । ततश्च तस्याऽप्युच्चार्यत्वात् देवतात्वान्तर्गत्यवगतेर्न महत्त्वरहितस्येन्द्रस्य तद्धितार्थान्वयः(१)सम्भवति । किञ्च सम्भवति विधेयेन्द्रविशेषणत्वेनाऽर्थवत्त्वे उपलक्षणत्वस्य स्तावकत्वस्य चाऽन्याय्यत्वान्न शुद्धस्येन्द्रस्य देवतात्वम् । राजपुरुषश्शोभन इत्यादौ तु प्रमाणान्तरानुरोधेन तथाऽङ्गीकरणमिति न किञ्चिदेतत् । अत एव च सान्नाय्ये "ऐन्द्रं दध्यमावास्यायामैन्द्रं पयोऽमावास्यायाम्, माहेन्द्रं दध्यमावास्यायां माहेन्द्रं पयोऽमावास्याया"मिति व्यपदेशभेदः । अन्यथा तत्राऽपि महत्पदानर्थक्यम् ॥ १८ ॥

तथा याज्यापुरोरुचोः ॥ २-१-१९ ॥

तथा सान्नाय्य एवेन्द्रमहेन्द्रदेवत्ययाज्यापुरोनुवाक्ययोर्भेदेनाऽम्नानमपीन्द्रमहेन्द्रयोर्भेद एवाऽवकल्पते।(२) अन्यथा एकेन

---

१. सम्भवीति. क. ख. पु. २. इतरथेति. ख. पु.

कार्यासिद्धेरितराम्नानमनर्थकं विकल्पो वा प्रसज्येत । न च भवन्मतेऽप्येकापूर्वसाधनत्वादिन्द्रमहेन्द्रयोर्धर्मसाङ्कर्यापत्तेर्विकल्पानिवारणम्, सम्मीलनादिवत्प्रतिनियतधर्मानिर्देशेन साङ्कर्यानापत्तेः।

वस्तुतस्तु मन्त्राणां लिङ्गेन मुख्य एवाऽर्थे विनियोगात्(१) 'व्रीहीणां मेध सुमनस्यमान' इतिवदेकापूर्वसाधनीभूतेऽप्यर्थान्तरे अप्राप्तत्वेन साङ्कर्यप्रसङ्ग एव नाऽस्ति । अतो याज्यापुरोनुवाक्ययोर्भेदाम्नानमपि देवताभेदसाधकम् । सूत्रे पुरोरुक्छब्दश्शस्त्रगतमन्त्रविशेषवाच्यपि लक्षणया पुरोनुवाक्यापरो द्रष्टव्यः ॥१९॥

वशयामर्थसंयोगात् ॥ २-१-२० ॥

यत्तु वशात्वगुणविशिष्टद्रव्यविधावपि छागशब्देन विशेष्यमात्रप्रकाशनं दृष्टमित्युक्तम्, तद्वशात्वस्य(२) स्वरूपत एवोपकारकत्वादुपायान्तरेणाऽपि स्मृत्या कर्मण्यनुष्ठानोपपत्तेर्नाऽवश्यं शब्दोच्चारणापेक्षा । प्रकृते तु महत्त्वस्य महत्पदोच्चारणद्वारैणैवोपकारकत्वान्नाऽनुच्चरितस्य साधनत्वं संभवतीति विशेषः ॥२०॥

यत्रेति वाऽर्थवत्त्वात्स्यात् ॥ २-१-२१ ॥

ननु यत्र माहेन्द्रग्रहसन्निधावयमैन्द्रः प्रगाथः पठितः, तत्रैवाऽस्य मनोतास्थाग्नि(३)पदवल्लक्षणया महत्त्वविशिष्टेन्द्रप्रकाशकत्वेन निवेशकल्पनादर्थवत्त्वोपपत्तिः । वस्तुतस्तु नेदृशस्थले लक्षणा । त्यागवेलायां महेन्द्रपदप्रयोगेऽपि मन्त्रे विशेष्यभूतेन्द्रमात्रप्रकाशनेन मन्त्रस्याऽपूर्वीयदेवतात्वाश्रयवाच्यभूतेन्द्रप्रकाशना-

---

१. तै. ब्रा. ३. ७. ५.
२. स्वत एवेति क. पु.
३. शब्दवदिति. ख. पु.

र्थत्वेनाऽप्युपपत्तेः । मनोतास्थाग्निशब्दे तु देवतावाचिमनोतापद-सामानाधिकरण्येन लक्षणाङ्गीकरणमित्युक्तं(१) मन्त्राधिकरणे । अतश्च यथापठितस्याऽप्युपपत्तेर्नोत्कर्षापत्तिः । अथ वा पूषानु-मन्त्रणमन्त्रवदूदुर्बलप्रमाणबाधेनोत्कर्षाङ्गीकारेऽपि न क्षतिः । न च तत्र यागानुमन्त्रणमन्त्रसमाख्यावदिह सम्बन्धसामान्य बोधकप्रमाणाभावेनोत्कर्षस्याऽप्यनुपपत्तेरानर्थक्यापत्तिः, ऐन्द्र यागान्तरे तदभावेऽपि ज्योतिष्टोमप्रकरणस्थैन्द्रग्रहाभ्यासे प्रकरण स्यैव सामान्यसम्बन्धबोधकस्य सत्त्वेनोत्कर्षोपपत्तेः । अतश्च य-त्र प्रकरण एवैन्द्रो यागस्तत्राऽस्य प्रगाथस्योत्कर्षेऽप्यर्थवत्त्वोपप-त्तिरिति ॥ २१ ॥

न त्वाम्नातेषु ॥ २-१-२२ ॥

न चैन्द्रस्य प्रगाथस्य प्रकरणे उत्कर्षसम्भवेऽप्यन्येषु तंत्त-द्ग्रहाभ्याससन्निधावाम्नातेषु मन्त्रेषु "याम्याश्शंसति, शि-पिविष्टवतीश्शंसति, पितृदेवत्याश्शंसति, कुसुंभकसूक्तमन्वाह, अ-क्षसूक्तं मण्डूकसूक्तं मूषिकसूक्तमन्वाहे"त्यादिविधिविहितेषु प्र-करणेऽपि यमादीनामभावात्तत्रोत्कर्षानुपपत्तेः, प्रकरणबहिर्भूते यमादिदैवत्यकर्मणि च सामान्यसम्बन्धबोधकप्रमाणाभावेनोत्क-र्षानुपपत्तेः, कुसुम्भकादीनां चाऽन्यत्राऽपि देवतात्वाभावेन सु-तरां तदनुपपत्तेर्नाऽर्थवत्त्वोपपत्तिरिति वाच्यम् ॥ २२ ॥

दृश्यते ॥ २-१-२३ ॥

सर्वेषामेवाऽर्थवत्त्वोपपत्तेः । तथा हि--मण्डूकसुक्तस्य ता

१. पू. मी. १. २. ४.

वत्(१) "मण्डूकेनाऽग्निं विकर्षती"ति विहितमण्डूकप्रकाशकत्वेनाऽग्नावुपयोगः । न च तस्याऽनारभ्याधीतत्वेन सामान्यसम्बन्धबोधकप्रमाणाभावः, मण्डूकसूक्तस्य प्रकरणाज्ज्योतिष्टोमसम्बन्धेऽवगते(२) आनर्थक्यतदङ्गन्यायेन तदङ्गभूते चयने निवेशोपपत्तेः । एवं मूषिकसूक्तस्याऽपि प्रकरणाज्ज्योतिष्टोमाङ्गभूतयूपैकादशिन्यां निवेशः । तत्र च यद्यप्याखोर्न साक्षाद्विनियोगः, तथाऽप्युपशये यूपे(३) "सर्वे वा अन्ये यूपाः पशुमन्तोऽथोपशय एवाऽपशुरि"त्युपक्रम्य द्वेष्याभावे "आखुस्ते पशुरिति ब्रूयादि" ति मन्त्रविधानेनाऽऽखुस्मृतिद्वारा लक्षणया तत्सम्बन्ध्युपशयस्तुतिरिति द्रष्टव्यम् ।

ये तु याम्यादिमन्त्रास्तेषां प्रकरणे कथमपि निवेशासम्भवेनोत्कर्षायोगादन्यत्र च सामान्यसम्बन्धबोधकप्रमाणाभावेनैव तदप्रसक्तेरगत्या प्रकृतग्रहदेवतैव लक्षणया तैः प्रकाश्यते । प्रयोगाभावेन निषिद्धलक्षणानङ्गीकारे तु जपादिमन्त्रवद्याम्यादिमन्त्राणामप्यदृष्टार्थमुच्चारणं प्रकृतग्रहयागाङ्गत्वेन विधीयते । अस्मिंश्च पक्षे स्तौतिशंसत्योर्गुणविशेष्यकप्रकाशनलक्षकत्वाभावेऽपि लक्षणयोच्चारणपरत्वमेव द्रष्टव्यम् ।

यदि त्वस्मिन् पक्षेऽदृष्टार्थत्वस्याऽऽवश्यकत्वे लक्षणाङ्गीकारे प्रमाणाभावश्शंक्येत, ततो याम्यादिविषये गुणविशेष्यकगुणिसम्बन्धकीर्तनात्मकस्तोत्रशस्त्रविधानमेवाऽदृष्टार्थमङ्गीक्रियते । न चैतावता सर्वत्रैव तथा प्रसङ्गः, अनुपपत्तेरभावात् । न च याम्यादिमन्त्रेषु आघारवन्मन्त्रवर्णकल्प्यदेवताङ्गीकारेण तद्दैवत्ययागान्तरस्यैव कल्पयितुं शक्यत्वात्, किमिति सिद्धान्त्यभिप्रेतस्तोत्रशस्त्रादृष्टार्थताङ्गीकरणमिति वाच्यम् । याम्यादिमन्त्रैस्स्तुति-

१. तै. सं. ५. ४. ४. २. पू. मी. ३. १. ९. ३. तै. सं. ६. ६. ४. ५.

भाक्त्वरूपदेवतात्वकल्पनेऽप्याघारवद्द्रव्यसम्बन्धाभावे हविर्भाक्त्वरूपदेवतात्वाकल्पनात् तदेककल्प्ययागानुमानानुपपत्तेः । अत एव जपादिमन्त्रेषु न यागान्तरकल्पनम् । किन्त्वदृष्टार्थत्वमेव ।

न चाऽन्येषु जपादिमन्त्रेष्वदृष्टार्थत्वेऽप्यत्र "यद्यज्ञस्य साधनता व्यापद्येत अतो देवा अवन्तु न इति जपेत् अपि वाऽन्यां वैष्णवीमि" त्यादौ विष्णुप्रकाशकस्य मन्त्रस्योपांशुयाजाङ्गत्वेन विद्वद्वाक्यविहितकर्मणि मान्त्रवर्णिकदेवताकल्पकत्वेनोपपत्तेः किमित्यदृष्टार्थत्वाङ्गीकरणमिति वाच्यम् । विधिवाक्यादेवैतस्य मन्त्रस्य यज्ञसाधनलोपनिमित्तवैगुण्यसमाधानार्थत्वेनाऽवगतत्वादर्थान्तराकाङ्क्षानुपपत्तेः । अतो जपादिमन्त्रवदेव याम्यादिमन्त्राणामदृष्टार्थत्वं सिद्धान्त्यभिप्रेतस्तुतिरूपत्वमेव वाऽङ्गीकर्तव्यम् ।

यत्तु मूले "वाचस्तोमे सर्वा ऋचस्सर्वाणि यजूंषि सर्वाणि सामानि पारिप्लवं शंसती"ति विहिते शस्त्रे सर्वेषां मन्त्राणां विनियोगाद्याम्यादीनामपि तत्रैवोत्कर्षः । यद्यपि च तत्र दृष्टविधया नोपयोगः, तथाऽप्यदृष्टद्वारैव तदुपपत्तिरित्युक्तम्, तत् वाचस्तोमेऽप्यदृष्टार्थतावश्यकत्वे याम्यादीनामपि सन्निध्यबाधार्थं प्रकृत ग्रह एवाऽदृष्टार्थत्वस्य न्याय्यत्वादुपेक्षितम् । यदि तु वचनेन सन्निधानबाधान्न प्रकृतग्रहसम्बन्ध इत्याशंक्येत, ततो दर्शपूर्णमासादिप्रकरणपठितानां जपादिमन्त्राणामन्येषां च लिङ्गादिविनियुक्तानां वचनेन लिङ्गादिबाधापत्तेर्न तदङ्गत्वसम्भवः । अथ तु वाक्यस्याऽपि सामान्यविषयस्य विशेषनिष्ठलिङ्गादिबाधकत्वायोग उच्येत, ततस्सन्निधानेऽपि तुल्यम् । तस्मात्पूर्वोक्तविधयैवाऽर्थवत्त्वदर्शनं व्याख्येयम् ॥ २३ ॥

अपि वा श्रुतिसंयोगात्प्रकरणे स्तौतिशंसती क्रियोत्पत्तिं विदध्याताम् ॥ २-१-२४ ॥

ऐन्द्रस्य प्रगाथस्योत्कर्षस्सम्भवी । स हि न तावत्प्राकरणिक एवैन्द्रयागे, तस्याऽवान्तराधिकारविहितमन्त्रान्तरावरोधेन तत्राऽस्य मन्त्रस्याऽनवकाशात् । नाऽपि क्रतुप्रकरणबहिर्भूते इन्द्रयागान्तरे । तत्र सामान्यसम्बन्धबोधकप्रमाणाभावेनोत्कर्षानुपपत्तेः । इन्द्रशब्देन मनोतास्थाग्निशब्दवन्महेन्द्रप्रतिपादनं तु लक्षणा(१) भिया त्वयैव निरस्तम् । अवशिष्यते तावद्यागवेलायां विशेषणयुक्तप्रकाशनेऽपि मन्त्रे विशेष्यमात्रप्रकाशनं नाऽनुपपन्नमिति ।

तत्रेदं वाच्यम्—स्तौतिशंसत्योर्गुणिप्रकारकगुणविशेष्यकबोधानुकूलव्यापारवाचित्वस्य, गुणिनिष्ठगुणतात्पर्यकबोधानुकूलव्यापारवाचित्वस्य वा 'वक्रकेशान्तो देवदत्त' इत्याद विवाऽवधारणात् गुणिप्रकाशनार्थत्वे लक्षणापत्तेस्स्तौतिशंसतिवाच्यस्यैवाऽर्थस्य (२)विधेयत्वावगमात्तस्य च दृष्टार्थत्वासम्भवे अदृष्टार्थत्वकल्पनस्य फलमुखत्वेन प्रामाणिकत्वान्नाऽनुपपत्तिरिति । लोके हि वक्रकेशो देवदत्त इत्यत्र देवदत्ते वक्रकेशत्वप्रतिपादन एव स्तुतिबुद्धिरुत्पद्यते, न पुनर्वक्रकेशत्वस्य देवदत्तविशेष्यताप्रतिपादने । तेन स्तौतिशंसतिपदशक्तिपर्यालोचनया प्रकाशनार्थत्वावगमादृष्टार्थत्वाङ्गीकारेणाऽपि गुणिप्रकारकगुणविशेष्यकशाब्दबोधानुकूलव्यापाररूपस्तुतिविधायित्वमेव युक्तम् । न च 'प्रयाजशेषेणे'तिवददृष्टार्थत्वानुरोधेन लक्षणाङ्गीकरणमप्यदोषः, प्रकाशनस्य लिङ्गकल्प्यश्रुतिबलेनैव प्राप्तिसम्भवे लक्षणयैव तत्प्रतिपादनेऽपि विधिवैय्यर्थ्यात् । किञ्च दृष्टार्थत्वं किं त्वया मन्त्राणामभ्युपगम्यते ? स्तुतेर्वा ? नाऽऽद्यः, ममाऽपि स्तुतिनिष्पादकत्वेन तत्सत्वात् । नाऽन्त्यः स्तुतिस्वरूपस्यैव हानापत्तेः । तस्माद्धातुश्रुतिसंयोगात् प्रकरण एव स्तौतिशंसती स्तुतिरूप-

१. दोषास्त्वयैवेति. क. पु. २. विधेयत्वावसायादिति. क. पु.

क्रियोत्पत्तिं विदध्यातामिति सूत्रार्थः ॥ २४ ॥

शब्दपृथक्त्वाच्च ॥ २-१-२५ ॥

"द्वादशस्तोत्रोऽग्निष्टोमो द्वादशशस्त्रोऽग्निष्टोम" इति श्रुतं द्वादशत्वं न प्रकाशनलक्षणार्थत्वेऽवकल्पते, प्रकाशनानां प्रत्यृचं प्रतिपदं वा भिन्नत्वेन द्वादशत्वानुपपत्तेः । प्रकाशनत्वेनैक्याङ्गीकारे सुतरां तदनुपपतेश्च । अस्मन्मते तु सत्यपि प्रत्यृचं स्तुतिव्यक्तीनां भेदे विधिभेदेन विधेयतत्तदेकस्तुतिव्यक्तिवृत्तिविधेयतावच्छेदकीभूतवैजात्यावश्यंभावात्तत्तज्जातिगतद्वादशत्वोपपत्तिः । तव तु प्रकाशनस्य सामर्थ्यप्राप्तत्वेनाऽविधेयत्वान्न वैजात्य(१)कल्पने प्रमाणमस्ति ।

किञ्चाऽस्मन्मते वैजात्याकल्पनेऽपि तत्तद्विधिभेदेन विधेयभावनाभाव्यस्याऽनेकस्तुतिजन्यापूर्वस्य भेदावश्यंभावात्तद्गतद्वादशत्वेनाऽपि स्तोत्रादिद्वादशत्वोपपत्तिः । प्रकाशनपक्षे तु तस्य दृष्टार्थत्वेनाऽपूर्वानङ्गीकारात् दृष्टप्रयोजनैक्यस्य च प्रत्यक्षबाधितत्वेन द्वादशत्वानुपपत्तिः । अतो द्वादशशब्देन स्तोत्राणां शस्त्राणां च पृथक्शाक्षेपादपि न प्रकाशनलक्षणा ॥ २५ ॥

अनर्थकं च तद्वचनम् ॥ २-१-२६ ॥

प्रकाशनार्थत्वपक्षे अग्निष्टुति "आग्नेया ग्रहा भवन्ती"ति वचनेन प्राकृतग्रहानुवादेनाऽग्निदेवताविधौ कृते प्राकृतदेवताबाधवत्तत्प्रकाशकमन्त्रबाधेनाऽग्निप्रकाशकमन्त्रान्तराणां न्यायादेव प्राप्तेः 'आग्नेयीषु स्तुवत'इति वचनवैयर्थ्यापत्तिः । न चाऽस्य

---

१. कल्पनायामिति. ख. पु.

प्राकृतमन्त्रेष्वेवाऽग्नियदोहमसक्तौ मन्त्रान्तरविधानेनाऽर्थवत्त्वमिति वाच्यम्। "पूयति वा य एतद्बर्होऽक्षरं यदेनद्बृहति तस्माद्बर्हं नोहेदि" ति वचनेन ऋगूहनिषेधादर्थप्रकाशनरूपकार्यबलेनाऽऽग्नेयमन्त्रान्तरस्यैव प्राप्तेः। अस्मन्मते तु सत्यपि ग्रहाणामाग्नेयत्वे कर्मासमवेतगुणनिष्ठस्याऽपि गुणस्य कीर्तनेन स्तोत्रशस्त्रजन्यादृष्टसम्पत्त्युपपत्तेः प्राकृतानामेव मन्त्राणामुच्चारणप्रसक्तौ तन्निवृत्त्यर्थं 'आग्नेयीषु स्तुवत' इति(१) सार्थकम्॥ २६॥

अन्यश्चाऽर्थः प्रतीयते॥ २-१-२७॥

'सम्बद्धं वै स्तोत्रं शस्त्रं चे'ति श्रुत्या स्तोत्रशस्त्रयोस्सम्बन्धप्रतीतेस्सम्बन्धस्य च(२) भेदसाधनत्वात्स्तोत्रशस्त्रयोस्स्वरूपतः फलतो वा वैजात्यकल्पनया भेदोऽवधार्यते। न चाऽसौ प्रकाशनार्थत्वपक्षे सम्भवति। न च (३)स्तोत्रादावपि प्रगानाप्रगानकृतस्सम्भवत्येवेति वाच्यम्। स्वरूपतः फलतो वा भेदभानसम्भवे प्रगानाख्याङ्गकृत(४)भेदस्याऽन्याय्यत्वात्॥ २७॥

अभिधानं च कर्मवत्॥ २-१-२८॥

यदिदं स्तोत्रशस्त्रादिरूपं सामान्याभिधानं, यच्चाज्यपृष्ठप्रउगादिरूपं विशेषाभिधानम्, तदुभयमप्यारादुपकारकत्वपक्षे उपपद्यते, न तु संस्कारकर्मत्वपक्षे। संस्कारस्य संस्कार्यनिरूपणाधीननिरूपणीयस्य संस्कार्येणैवाऽवच्छेदसिद्धौ अवच्छेदकीभूतसंज्ञानपे-

---

१. वचनं नाऽनर्थकमिति. क. ख पु.
२. भेदनिबन्धनत्वादिति. क. ख. पु. ३. तत्राऽपीति. क. पु.
४. भेदाङ्गीकरणस्येति. ख. पु.

क्षत्वात् । एवं सत्यपि यद्यारादुपकारकत्वग्राहकः स्तौतिशंस-तिधातुरूपः श्रुतिसंयोगस्संस्कारकर्मत्वबाधको न स्यात्, ततो लिङ्गेन संस्कारकर्मत्वस्यैवाऽवधारणात् "अंशुं गृह्णात्यदाभ्यं गृह्णाती" तिवदगत्या सत्यप्यवच्छेदकान्तरे संज्ञावच्छिन्नमेव ज्ञातं कृतं कर्माऽभ्युदयकारि भवतीति कल्पनया संज्ञाऽप्यङ्गीकियेत, न त्वेतदस्तीत्यत आरादुपकारकत्वमेव युक्तमुत्पश्यामः ॥ २८ ॥

फलनिर्वृत्तिश्च ॥ २-१-२९ ॥

(१)"स्तुतस्य स्तुतमस्यूर्जस्वत्पयस्वदा मा स्तोत्रस्य स्तोत्रं गम्यादिन्द्रवन्तो वनामहे भक्षीमहि प्रजामिषम्, सा मे सत्याशीर्यज्ञस्य भूयादि" ति मन्त्रे भावनिष्ठान्तेन स्तुतपदेन स्तोत्रक्रियोपादानात्, स्तोत्रस्य मध्ये स्तोत्रमसि, तदेवं भूतं स्तोत्रस्योर्जस्वत्पयस्वद्भूत्वा मां आगम्यात्, इन्द्रवन्तः इन्द्रोपलक्षितदेवतावन्तो वयं, त्वां याचामहे, प्रजामिषं भजेमहीति सेयं यज्ञपदलक्षितस्य स्तोत्रस्याऽऽशीस्सत्या भूयादित्यर्थकस्तोत्रादेव फलं प्रार्थितं, न देवतातः । यद्यपि च नेदं स्तोत्रस्य फलं करणविभक्तिसंयोगाभावेनाऽवगतक्रत्वङ्गभावस्य स्तोत्रस्य मान्त्रवर्णिकफलकल्पनानुपपत्तेः, तथाऽपि प्रधानफलमेवेदं परम्परासम्बन्धेन स्तोत्रात्प्रार्थितं, लक्षणया वा स्तोत्रफलमेव क्रतूपकाराख्यम् । अतश्च स्तोत्रक्रियातः फलप्रार्थनात्तस्या एव प्राधान्यम् , न देवतायाः। इतरथा हि देवतात एव फलं प्रार्थ्येत, प्राधानत्वात्, नाऽङ्गभूतात्प्रकाशनात् । किञ्च प्रकाशनस्य दृष्टफलस्य प्रत्यक्षगम्यत्वान्न

१. तां. ब्रा. १. ६. ३.

प्रार्थनार्हत्वं, स्तोत्रफलस्य त्वदृष्टत्वात्तदर्हत्वमिति विशेषः । अत आरादुपकारकाण्येव स्तोत्रशस्त्राणीति सिद्धम् ।

प्रयोजनं प्राकृतग्रहानुवादेन विकृतौ देवतान्तरविधाने 'आग्नेयीषु स्तुवत'इत्येवंविधवचनाभावे प्राकृतानां मन्त्राणामविकारेण प्रयोगः सिद्धान्ते । पूर्वपक्षे प्राकृतऋग्बाधेन वैकृतदैवत्यऋगन्तरागम इति (१)दशमे वक्ष्यते ॥ २९ ॥

इति षष्ठं स्तुतशस्त्राधिकरणम् ॥ ६ ॥

अथ सप्तमं विधिमन्त्राधिकरणम् ॥ ७ ॥

विधिमन्त्रयोरैकार्थ्यमैकशब्द्यात् ॥ २-१-३० ॥

(विषयसंशयसङ्गतयः)

एवं 'एष ह्यर्थो विधीयत' इत्यनेनोपक्षिप्तानां विधायकाख्यातानां "तानि द्वैध" मित्यादिना द्वैविध्यमुक्त्वा इदानीं प्रसङ्गादाख्यातस्याऽपि क्वचिद्विधायकत्वं नाऽस्तीति प्रतिपाद्यते । यथा(२) "न ता नशन्ति न दभाति तस्करो नासाममित्रो व्यथिरादधर्षति । देवांश्च याभिर्यजते ददाति च ज्योगित्ताभिस्सचते गोपतिस्सह" इत्यादिमन्त्रे "यस्योभयँ हविरार्तिमार्छेत्" दित्यादौ ब्राह्मणे च ये यच्छब्दादिसमभिव्याहृता आख्यातशब्दास्ते किं विधायकाः ? उत नेति संशयः । अत्राऽप्यपूर्वभेदोपयोगिन एव विचार्यमाणत्वात्पादाध्यायसङ्गती स्पष्टे । प्रासङ्गिकीत्वनन्तरा ।

---

१. पू. मी. १०. ४. २४. २. ऋ. सं. ४. ६. २५.

(पूर्वपक्षः)

तत्र 'आछेंदि'त्यादौ असन्दिग्धलिङ्श्रवणात् यजते ददाति चेत्यादावपि स्तुत्युन्नीतलेडन्तत्वावधारणात् 'यजेत स्वर्गकाम' इतिवदेव विधायकत्वाविघातः । न च यच्छब्दादिना प्रतिबन्धः, यच्छब्देन गोपदार्थस्य सिद्धत्वद्योतनेऽपि "यदाग्नेयोऽष्टाकपाल" इतिवद्यागसाधनत्वेन विध्युपपत्तेः । अत एव कर्तृसमानाधिकरणस्य यच्छब्दस्यैव प्रतिबन्धकता न कर्मसमानाधिकरणस्येति सिद्धान्तिनोऽपि प्रवादः ।

वस्तुतस्तु गुणभूतेन यच्छब्दादिना प्रधानभूतविधिशक्तिप्रतिबन्धस्याऽन्याय्यत्वात्कर्तृसमानाधिकरण(१)यच्छब्दे सत्यपि न विधिस्वव्याघातः । किञ्च यच्छब्दादिकं प्राप्तिं द्योतयत्प्रतिबन्धकं वाच्यम् । सा यदि प्राप्तिः प्रमाणान्तरेणाऽस्ति तदा तेनैव प्रतिबन्धसिद्धेः कृतं यच्छब्दादिना । यदि नाऽस्ति ततो यच्छब्दसद्भावेऽपि "य एवं विद्वानग्निं चिनुत" इतिवदप्राप्तार्थकत्वादेव विध्युपपत्तेर्न यच्छब्दादेः प्रतिबन्धकता संभवति ।

वस्तुतस्तु एतस्य मन्त्रस्य गोद्रव्यकानुबन्ध्यपशुपुरोडाशानुनिर्वाप्यदैविकहविर्यागे चरुद्रव्यके गोदैवत्ययाज्यात्वेन विनियुक्तत्वात्तत्र च चरुद्रव्यकत्वाद्गोद्रव्यकत्वाभावेन तत्र विनियुक्तस्याऽप्यस्याऽप्राप्तस्वतन्त्रगोद्रव्यकयागविधायकत्वोपपत्तेः । न च साक्षाच्छेषिणि दैविकहविर्यागे गोद्रव्यकत्वाप्राप्तावपि तच्छेषिण्यामनुबन्ध्यायां गोद्रव्यकत्वस्य प्राप्तत्वादविधायकत्वोपपत्तिरिति वाच्यम् । एवं यथाकथञ्चित्प्राप्तिसंभवेऽप्यभ्यासात्कर्मान्त-

---

१. यच्छब्दसत्वेऽपीति. क. ख. पु.

रत्वोपपत्तेः । अतश्च 'यजेत स्वर्गकाम'(१) इतिविध्याख्यातवन्मन्त्रगतस्याऽप्याख्यातस्य विधिरूपैकप्रयोजनकत्वमेव । विधायकशब्दत्वस्योभयत्र समानत्वादिति सूत्रार्थः । अत्र च मन्त्रग्रहणं यच्छब्दादिसमभिव्याहृताख्यातमात्रोपलक्षणम्, न तु स्वतन्त्रम्, "वसन्ताय कपिञ्जलानालभेते" त्यादावभियुक्तप्रसिध्या मन्त्रत्वेऽपि विधायकत्वाङ्गीकारात् । 'यस्योभयमि'त्यादौ च ब्राह्मणे यच्छब्दादिसमभिव्याहारे तदनङ्गीकाराच्च । अतश्च सर्वस्याऽप्यत्रोदाहरणत्वेऽपि प्रायशो यच्छब्दादिसमभिव्याहारस्य(२) तेष्वेव सत्त्वात्सूत्रे मन्त्रग्रहणम् ॥ ३१ ॥

अपि वा प्रयोगसामर्थ्यान्मन्त्रोऽभिधानवाची स्यात् ॥ २-१-३२ ॥

(सिद्धान्तः)

नैते विधायकाः, 'यजत' इत्यादीनां लट्लेट्साधारणत्वेन विध्यर्थकत्वानिश्चयात् । न च(३) स्तुत्या तन्निश्चयः, विधेरभावे स्तुतेरेवाऽनिश्चयेन तस्यास्तदनिश्चायकत्वात् । न च "वसन्ताय कपिञ्जलानालभेते"त्यादिवदप्राप्तार्थकत्वमेव तन्निश्चायकम्, गोद्रव्यकस्य यागदानादेरनूबन्ध्यारूपस्य तदन्यस्य वा बहुशः प्राप्तत्वेन तदसिद्धेः । अत एव न विधिपुनश्श्रवणरूपादभ्यासात्कर्मान्तरत्वं शङ्क्यम्, विधित्वस्यैवाऽनिश्चयेनाऽभ्यासस्वरूपाभावात् । विध्यभावेऽपि पुनश्श्रुतिमात्राद्भेदस्तु पुनश्श्रुतेस्स्मरणार्थत्वेनाऽप्युपपत्तेरनन्यपरत्वाभावादयुक्तः । किञ्च यद्यप्यत्र

---

१. इत्यख्यातवदिति क. पु. २. मन्त्रेष्वेवेति. क. ख. पु.
३. स्तुतिरेव तन्निश्चायिकेति क. ख. पु.

विधायको लिङादिरश्रोष्यत, तथाऽपि यच्छब्दादिना विधिशक्तिप्रतिबन्धान्नाऽस्य विधायकत्वोपपत्तिः ।

तथा हि—यच्छब्दस्तावत्स्वसमभिव्याहृतार्थस्य सिद्धतां द्योतयन्प्राप्तिमपेक्षते । अस्ति चाऽत्र सा । अतो गोद्रव्यकयागदानादेरनूद्यमानस्याऽज्ञातज्ञापनैकस्वभावविधिविषयत्वायोगस्पष्ट एव । न च यच्छब्दस्य स्वार्थमात्रे सिद्धताद्योतकत्वाद्गोस्वरूपानुवादेऽपि तस्य साधनत्वेन विध्युपपत्तिरिति वाच्यम् । यः पाकं करोति स भुङ्क्ते इत्यादौ यत्तच्छब्दयोस्स्वसमभिव्याहृतमात्रे सिद्धत्वद्योतकताव्युत्पत्तेः । अतश्च याभिर्यजते, याश्च गा ददाति, ता न नश्यन्ति , न च तस्करो दभ्नोति, न वासां अमित्रकृता व्यथा अभिभवति, गोस्वामी च ताभिस्सह चिरं नन्दतीति यच्छब्देन समभिव्याहृते गोद्रव्यके यागदानादावपि सिद्धताप्रतीतेर्न विधेयतोपपत्तिः । यच्छब्दस्य समभिव्याहृतवृत्तिसिद्धताद्योतकत्वादेव च यत्र कर्तृसमभिव्याहारस्तत्र कृत्याश्रयत्वरूपस्य कर्तृत्वस्य सिद्धताप्रतीतौ कृतेरपि तत्प्रतीतेर्विधेयत्वानुपपत्त्या विधिशक्त्यनुपपत्तिः ।

यत्र तु कर्ममात्रसमभिव्याहृतो यच्छब्दस्तच्छब्दसमभिव्याहृतश्च विधिः, तत्र सत्यपि कर्मस्वरूपस्याऽनुवादे कर्तव्यत्वेन विधानोपपत्तेः न विधिशक्तिप्रतिबन्धकता यच्छब्दस्य । प्रकृते तु विधेर्यच्छब्देनैव समभिव्याहाराद्युक्ता प्रतिबन्धकतेति विशेषः । एवं सत्यपि यदि कथञ्चिदप्यालोच्यमाने प्राप्तिर्न सम्भाव्येत, ततो 'यदाग्नेयोऽष्टाकपाल' इतिवद्यच्छब्दस्य स्वार्थमात्र(१)सिद्धत्वद्योतकतामङ्गीकृत्य विधेर्विधायकत्वोपपत्तेर्न शक्तिः प्रतिबध्येत ।

---

१. प्रसिद्धिद्योतकेति ख. पु.

न त्वेतदस्ति, गोद्रव्यकस्य यागदानादेर्बहुशः प्राप्तत्वात् ।

यत्तु सत्यपि यच्छब्दस्य विधिविरोधित्वे प्रधानभूतत्वाद्विध्यनुग्रह एव न्याय्यः, न गुणभूतयच्छब्दानुग्रह इत्युक्तम्, तत् 'उच्चैर्ऋचा क्रियत' इत्यादौ प्रधानभूतस्याऽप्युपसंहारस्यस्य विधेरुपक्रमस्थेन गुणभूतेनाऽप्यर्थवादेन बाधस्य वक्ष्यमाणत्वादकिञ्चित्करम् ।

वस्तुतस्तु विधिवदेव यच्छब्दस्याऽपि प्रधानभूतार्थभावनान्वयित्वान्न विधिं प्रति तस्य गुणत्वम् । यदि परं पदान्तरत्वात्तदपेक्षया विप्रकर्षशङ्क्येत, ततः "ऐन्द्रं पञ्चशरावं" मित्यनेन वाक्यभेदापत्तेः (१)'हेतुहेतुमतोरि'त्यनुशासनवैयर्थ्यापत्तेश्च विधिशक्तिप्रतिबन्धोऽनुसन्धेयः ।

एवं यदिशब्दस्याऽपि निमित्तपरत्वेन प्राप्तिद्योतकत्वाद्विधिविरोधित्वं द्रष्टव्यम् । अतश्चोभयत्राऽपि लिङ्श्रवणं 'हेतुहेतुमतोरि'ति स्मृतेर्हेतुरूपनिमित्तत्वादिपरम् । यजते ददातीत्यत्र तु (२)लिङोऽश्रवणाल्लडन्तत्वस्यैव निश्चयः । एवं "अग्नीदग्नीन्विहरे" त्यत्र सम्बोधनविभक्तेर्वक्त्राभिमुखश्रोतृमात्रविषयत्वाद्वेदे च वक्तुरभावाद्विधेश्चाऽभिमुखानभिमुखसर्वपुरुषसाधारणत्वाद्विरुद्धस्वभावेनाऽऽमन्त्रणेन विधिशक्तिप्रतिबन्धः । अतश्च लोऽप्यत्र नाऽलौकिकविध्यर्थकः, किन्तु(३) "प्रैषातिसर्गप्राप्तकालेषु कृत्याश्चे" ति चकारात् प्रैषार्थक एव, लौकिकप्रवर्तनार्थको वा ।

यत्तु न्यायसुधाकृता सम्बोधनविभक्तिसमभिव्याहृतस्य लिङादेः प्रमाणान्तरप्रवृत्तपुरुषप्रवर्तकत्वावगमादप्रवृत्तप्रवर्त्तनात्मकविधिशक्तिव्याघात इत्युक्तम्, तत् लोके प्रमाणान्तरानधिगमेऽपि देवदत्त गामानयेत्यादौ सम्बोधनविभक्तिप्रयोगदर्शनादुपे-

१. पा.सू. ३.३.१५३. २. लिङभावादिति क.पु. ३. पा.सू.३.३.१६३.

क्षितम् । एवं ददामि गृह्णामीत्यादौ तावल्लडन्तत्वादेव न विधिशक्तिः । विशेषतश्चाऽस्मदर्थविषयोत्तमपुरुषान्तत्वेन परप्रवर्तनात्मकविधिविरोधित्वम् । अतश्च यत्राऽपि अहं दद्यामित्यादौ लिङः श्रवणमुत्तमपुरुषे, तत्राऽपि लिङः स्वनिष्ठप्रवर्तनापरत्वमेव लक्षणया, न तु परप्रवर्तनात्मकविधिवाचित्वमिति विवेकः । अतश्च यच्छब्दादिचतुष्टयस्य प्रतिबन्धकत्वात् तत्समभिव्याहृतस्य लिङादेर्न विधायकत्वम्, अपि तु प्रमाणान्तरासिद्धानुवादकत्वमेव । न चैवमानर्थक्यम्, ब्राह्मणगतानां निमित्तादिप्रतिपादकतया विध्यपेक्षितोद्देश्यसमर्पणेनोपयोगस्य वक्ष्यमाणत्वात् । मन्त्रगतानां तु यद्यपि विधेयसमर्पणेन वा उद्देश्यसमर्पणेन वा न विध्युपयोगः । नाऽपि स्तावकत्वेन, दूरस्थानां पदैकवाक्यत्वेन तावत्तस्याऽनुपपत्तेः, पदार्थविधया स्तुतिमात्रलक्षणायामपि स्वार्थबोधे समाप्त्यभावेन वाक्यैकवाक्यत्वेनाऽप्यनुपपत्तेश्च, तथाऽपि परिशेषान्मन्त्राधिकरणन्यायेन प्रयोगकाले ऽर्थाभिधायकत्वेनैव । अर्थोऽपि च यत्र प्रयोगसमवेतस्तत्र तदभिधानं दृष्टार्थम्, नो चेददृष्टार्थमिति विवेकोऽपि तत्रैव द्रष्टव्यः ।

सूत्रे च अपिवाशब्देन मन्त्रब्राह्मणसाधारण्येन विधायकत्वे निरस्ते ब्राह्मणगताख्याते निमित्तपरत्वं वक्ष्यमाणत्वादुपेक्ष्य मन्त्रगते तस्मिन्नर्थाभिधानव्यापारकत्वं मन्त्राधिकरणसिद्धमेव स्मारितमिति द्रष्टव्यम् । प्रयोजनं स्पष्टम् ॥ ३२ ॥

इति सप्तमं मन्त्राविधायकत्वाधिकरणम् ॥ ७ ॥



अथाऽष्टमं मन्त्रलक्षणाधिकरणम् ॥ ८ ॥

तच्चोदकेषु मन्त्राख्या ॥ २-१-३३ ॥

(विषयसंशयसङ्गतयः)

पूर्वाधिकरणे उपलक्षणतया मन्त्रशब्दप्रयोगादुपस्थितस्य मन्त्रस्येह लक्षणं प्रसङ्गादुच्यते । तत्र च(१) "अहे बुध्निय मन्त्रं मे गोपाय । यमृषयस्त्रयीविदा विदुः । ऋचस्सामानि यजूँषि । सा हि श्रीरमृता सता" मिति मन्त्रे प्रयुक्तस्य मन्त्रपदस्याऽर्थकथनाद्वेदवाक्यार्थविचारवत् पदार्थविचारस्याऽपि शास्त्रे कर्तव्यत्वेन प्रतिज्ञानाच्छास्त्रसङ्गत्युपपत्तिः । मन्त्रनियमादृष्टरूपापूर्वभेदोपयोगिमन्त्रभेदसिध्यर्थत्वाच्च पादाध्यायसङ्गतिः । यद्यपि तत्तददृष्टत्वावच्छिन्नं प्रति तत्तदानुपूर्वीकत्वेनैव कारणता, तथाऽपि 'यद्विशेषयोः कार्यकारणभावस्तत्सामान्ययोरपि स' इत्यभिप्रेत्येदम् । प्रासङ्गिकी त्वनन्तरा ।

तत्र यथाश्रुतसूत्रस्वारस्यात्तावत् प्रयोगकाले अर्थप्रकाशकत्वं मन्त्रत्वमिति लक्षणं प्रतीयते। अत्र प्रयोगकाल इति विशेषणान्न विधावतिप्रसङ्गः । जपेष्वपि चाऽदृष्टार्थमर्थप्रकाशनान्नाऽव्यापकत्वम् । वस्तुतस्तु मन्त्रकाण्डसमाम्नाते(२) 'वसन्ताय कपिञ्जलानालभेते'त्यादौ मन्त्रे विधायकत्वाङ्गीकारेणाव्यापकत्वापत्तेः । ब्राह्मणस्याऽपि च मन्त्राभावे स्मारकत्वस्य(३) पञ्चमे वक्ष्यमाणत्वेन तत्राऽतिव्याप्त्यापत्तेः । अनृक्सामादिमन्त्रेषु च कथमप्यर्थप्रकाशकत्वायोगेनाऽव्यापकत्वाच्चैतल्लक्षणायोगेनाऽभियुक्तानां मन्त्रपदवाच्यत्वप्रकारको यो निश्चयस्तद्विषयत्वं मन्त्रत्वमिति लक्षणमेव

---

१. तै. ब्रा. १. २. १. २. मा. सं २४. २०. ३. पू. मी. ५. १. ४.

सर्वव्यापकं सूत्रकृदभिप्रेतमिति प्रतीयते ।

ननु तत्राऽपि मन्त्रपदवाच्यतावच्छेदकानिश्चये वाच्यत्वप्रकारकनिश्चयायोगेन कथं लक्षणप्रसिद्धिः ? न हि मन्त्रत्वं नाम जातिः, यत् मन्त्रपदशक्यतावच्छेदकत्वेन निश्चीयेत, तथात्वे वेदत्वऋक्त्वादिवदेव गत्वादिना साङ्कर्यापत्तेः, अनेकवर्णाभिव्यक्तीनां यौगपद्याभावेन मन्त्रत्वस्याऽभिव्यक्त्यनापत्तेश्च । नाऽप्युपाधिः, स हि यदि मन्त्रपदवाच्यत्वप्रकारकप्रसिद्धिविषयत्वाख्यः, ततोऽन्योन्याश्रयता । यदि त्वन्यः, ततस्तस्यैव लक्षणत्वोपपत्तेर्नैतस्य सूत्रकृदभिप्रेततेति चेत्–न; अखण्डोपाधिरूपस्यैव वेदत्ववन्मन्त्रत्वस्य मन्त्रपदवाच्यतावच्छेदकत्वाङ्गीकारात् । अतश्च तदवच्छेदेन वाच्यत्वेऽवधारिते तत्प्रकारकनिश्चयाविषयत्वस्य लक्षणत्वोपपत्तिः ।

ततश्च सूत्रम्––तदर्थाभिधानं चोदकं प्रयोजकं येषां तेषु मन्त्राख्येष्वेवं यथाश्रुतमाभासमानमपि, तच्चोदकेषु मन्त्राध्येतृषु .या मन्त्राख्या मन्त्रपदवाच्यत्वप्रकारिका प्रसिद्धिः सैव विषयतासम्बन्धेन मन्त्रलक्षणामिति व्याख्येयम् । यानि तु वृत्तिकारेणाऽस्यन्तत्वत्वान्तत्वादीनि मन्त्रलक्षणान्युक्तानि तानि अस्यन्तत्वस्य त्वान्ते, त्वान्तत्वस्य चास्यन्तेऽभावेनाऽव्यापकत्वापत्तेर्भाष्यकारेणैव दूषितानीति ग्रन्थगौरवभयान्नेह प्रपञ्च्यन्ते ॥ ३३ ॥

इत्यष्टमं मन्त्रलक्षणाधिकरणम् ॥ ८ ॥

अथ नवमं ब्राह्मणलक्षणाधिकरणम् ॥ ९ ॥

शेषे ब्राह्मणशब्दः ॥ २-१-३४ ॥

मन्त्रलक्षणप्रसङ्गात्(१) "एतद्ब्राह्मणान्येव पञ्च हवींषी"त्यत्र वेदे प्रयुक्तस्य ब्राह्मणशब्दस्याऽर्थपरिज्ञानार्थं ब्राह्मणलक्षणमुच्यते--मन्त्रातिरिक्तवेदत्वं ब्राह्मणत्वमिति । अतश्च विधिवाक्यानि अर्थवादा उपनिषदश्च सर्वमपि ब्राह्मणम् । अत्र च ब्राह्मणत्वमपि मन्त्रत्ववदेवाऽखण्डोपाधिरूपं ब्राह्मणपदशक्यतावच्छेदकम् । अन्यथा मन्त्रातिरिक्तवेदत्वरूपब्राह्मणत्वस्येव ब्राह्मणातिरिक्तवेदत्वरूपस्य मन्त्रत्वस्याऽपि वक्तुं शक्यत्वेन विनिगमनाविरहात् । अतश्च यत्राऽभियुक्तानां ब्राह्मणमिति प्रसिद्धिः, तत् ब्राह्मणमिति लक्षणस्याऽपि मन्त्रवद्वक्तुं शक्यत्वेऽपि, रुचिवैचित्र्यान्मन्त्रातिरिक्तवेदत्वमेव ब्राह्मणं सूत्रकृता लक्षितम् । अथवा नैवेदं सूत्रं लक्षणाभिधानार्थम्, अपि तु शेषे मन्त्रातिरिक्तवेदभागे ब्राह्मणशब्दस्य येन केनचिल्लक्षणेन सुज्ञानत्वान्न मया लक्षणं वाच्यमिति लक्षणावक्तव्यत्वाभिधानार्थमेव व्याख्येयम् । अत एवाऽग्रे मन्त्रप्रस्तावेऽपि सङ्गच्छते । अत्राऽपि यानि वृत्तिकारेणेतिकरणबहुलत्वादीनि ब्राह्मणलक्षणान्युक्तानि तान्यव्यापकत्वापत्तेर्भाष्यकारेणैव दूषितानीति नेह प्रपञ्च्यते ॥ ३४ ॥

इति नवमं ब्राह्मणलक्षणाधिकरणम् ॥ ९ ॥

---

१. तै. ब्रा. १. ७. १.

अथ दशमं ऊह्यमन्त्रताधिकरणम् ॥ १० ॥

अनाम्नातेष्वमन्त्रत्वमाम्नातेषु हि विभागस्स्यात् ॥ २-१-३५ ॥

(विषयसंशयौ)

'तच्चोदकेषु मन्त्राख्ये'त्यनेन लक्षणद्वयसूचनात्कस्य मुख्यत्वं कस्य वाऽभ्युच्चयतेति विवेकायेदमधिकरणम् । प्रकृतितोऽतिदेशेन प्राप्ते "अग्नये जुष्टं निर्वपामी"ति मन्त्रे कार्यवशेन विकृतौ प्रक्षिप्यमाणमग्निपदस्थाने सूर्यादिपदमूहः । "आर्षेयं वृणीत" इति विधिवशादुच्चार्यमाणः काश्यपादिः प्रवरः। 'यजमानस्य नाम गृह्णाती'त्यादिविधित उच्चार्यमाणं देवदत्तपदं नाम । तदेतान्यूहप्रवरनामधेयानि किं मन्त्राः उत नेति विचारः । केचित्तु मन्त्रब्राह्मणात्मके वेदस्य द्वैराश्ये निरूपिते प्रसङ्गात्प्रत्यक्षपठित एव वेदे द्वैराश्यं, न त्वनुमित इति वक्तुमूहादीनां द्वैराश्यबहिर्भावोऽनेन प्रतिपाद्यत इत्याहुः । तेषां 'अनाम्नातेष्वमन्त्रत्वत्वमि'तिवदब्राह्मणत्वमित्यपि सूत्रापत्तेः उपेक्षैव युक्ता ।

(पूर्वपक्षः)

तत्र प्रयोगकाले अर्थाभिधायकस्यैव मन्त्रपदवाच्यत्वादूहादीनां चाऽर्थाभिधायकत्वस्य स्पष्टत्वात् मन्त्रपदैकवाक्यत्वाच्चैषां मन्त्रत्वम् । अन्यथा ह्यमन्त्रैकवाक्यतापन्नानां मन्त्राक्षराणामपि श्लोकैकवाक्यतापन्नमन्त्राक्षरवदमन्त्रत्वापत्तिः । ऊहे तु मन्त्रान्तर्गताग्निपदत्यागादप्यवशिष्टाक्षरेषु सा । अस्मन्मते तु मन्त्र-

भूताग्निपदयुक्तानामिव मन्त्रभूतसूर्यादिपदयुक्तानामपि मन्त्रत्वोपपत्तेर्नाऽयं दोषः । तस्माद्हादीनामपि मन्त्रत्वमिति प्राप्ते—

(सिद्धान्तः)

अभिधीयते—पूर्वसूत्रव्युत्पादिताव्याप्त्यतिव्याप्त्यादिदूषणवशेनैतल्लक्षणायोगस्य स्पष्टत्वादभियुक्तप्रसिद्धिविषयत्वस्यैव तल्लक्षणत्वं वाच्यम् । अतश्चोहादीनां तदभावेन मन्त्रत्वायोगस्स्पष्ट एव । न चैतावता तदेकवाक्यतापन्नमन्त्राक्षराणाममन्त्रत्वापत्तिः, मन्त्रत्वप्रत्यभिज्ञानस्य दृढत्वात् । अत एव कर्मकाले याज्यान्तःप्लुतिकरणेऽपि न मन्त्रत्वहानिः । यत्र तु श्लोकाद्येकवाक्यतापन्नद्वित्रिमन्त्राक्षरेषु न मन्त्रत्वप्रसिद्धिरभियुक्तानाम्, तत्र मन्त्रत्वे प्रमाणाभावस्स्पष्ट एव । अतश्चोहादिष्वभियुक्तप्रसिध्यभावेनाऽमन्त्रत्वेऽपि तदेकवाक्यतापन्नानामक्षरान्तराणां तत्सत्वान्मन्त्रत्वोपपत्तिः । एवञ्च 'ऐरं कृत्वोद्धेयमि'त्यादाविरापदस्य मन्त्रत्वप्रसिध्यभावेनाऽमन्त्रत्वेऽपि तदेकवाक्यतापन्नाक्षरान्तराणां मन्त्रत्वोपपत्तिः । गिरापदे मन्त्रत्वप्रसिद्धिस्तु अध्ययनकाले, पारायणादौ चोपयुज्यत इति द्रष्टव्यम् ।

यत्तु वार्तिके इरापदस्य 'ऐरमि'ति विधिवाक्ये तद्धितान्तर्गतत्वेनाऽऽम्नातत्वादस्यैव मन्त्रत्वमित्युक्तम्, तत् ब्राह्मणे समाम्नातस्याऽपि मन्त्रप्रसिध्यविषयत्वेन मन्त्रत्वायोगात् 'वसन्ताय कपिञ्जलानालभेते'त्यादिवन्मन्त्रकाण्डे पाठाभ्युपगमेऽपि वा ऐरपदस्यैव पठितत्वेन मन्त्रत्वापत्तेस्तद्विधेयस्येरापदस्य वस्तुतः पाठाभावेन मन्त्रत्वानुपपत्तेरतिशयार्थमिति द्रष्टव्यम् । एवं यत्राऽपि सूक्तवाकादौ "आशास्तेऽयं यजमानोऽसा" विति सर्वनामसंयुक्तमन्त्राम्नानम्, तत्राऽप्यसावित्यस्य स्वाध्यायकाले, मन्त्रस्याऽपि कर्मकाले तत्पदस्थाने पठनीयस्य देवदत्तादिपदस्य स्वरूपेणाऽपाठादभि-

युक्तप्रसिद्धिविषयत्वानुपपत्तेरमन्त्रत्वम् । न च सर्वनाम्नि मन्त्रतापसिद्धेस्तत्रानर्थक्ये तदनुमेयदेवदत्तादिपदविषयत्वकल्पनान्मन्त्रत्वोपपत्तिरिति वाच्यम् । सर्वनाम्न्यपि मन्त्रत्वप्रसिद्धेस्स्वाध्यायोपयुक्तत्वात् । अतोऽत्राऽपि देवदत्तादिपदे मन्त्रत्वोक्तिरतिशयार्थैव वार्त्तिके द्रष्टव्या । तस्मादाभियुक्तप्रसिध्याविषयत्वाद्युक्तमूहादीनामन्त्रत्वम् ।

प्रयोजनं--पूर्वपक्षे ऊहादिभ्रेषे मन्त्रभ्रेषनिमित्तं प्रायश्चित्तम् । सिद्धान्ते त्वङ्गभ्रेषनिमित्तकमेव । मन्त्रत्वनिमित्तकशब्दविकारादिसदसद्भावश्च । सूत्रं स्पष्टम् ॥ ३५ ॥

इति दशमं ऊहाद्यमन्त्रताधिकरणम् ॥ १० ॥



अथैकादशं ऋग्लक्षणाधिकरणम् ॥ ११ ॥

तेषामृग्यत्राऽर्थवशेन पादव्यवस्था ॥२-१-३६॥

एवं लक्षणस्थिरीकरणेन (१)मन्त्रपदे व्युत्पादितेऽधुना प्रसङ्गात्तदवान्तरभेदरूपस्य ऋगादेः "अहे बुध्निय मन्त्रं मे गोपाये"ति वेदस्थऋगादिपदार्थज्ञानार्थं लक्षणमुच्यते। तेषां मन्त्राणां मध्ये यत्र पादव्यवस्था 'त्रिपदा गायत्री' 'चतुष्पदा बृहती' त्यादिका सा ऋक् । अथवाऽस्मिन्नक्षरे पादसमाप्तिः, नाऽस्मिन्निति पादव्यवस्था यत्र सा ऋक्, वृद्धव्यवहारे तादृशमन्त्र एव ऋक्शब्दप्रयोगात्। सा च पादसमाप्तिः क्वचिदर्थवशेन। यथा(२) 'अग्निमीळे पुरोहितमि'त्यत्र। न चाऽत्र ऋगर्थापर्यवसानात्कथमर्थवशेन

१ मन्त्रपदार्थ इति. क, ख. पु. २. ऋ. सं. १. १. १.

पादस्य समाप्तिः ? ऋगर्थापर्यवसानेऽपि 'ईळे' इत्याख्यातपदादवान्तरार्थपर्यवसानोपपत्तेः । एवमपरयोरपि पादयोरेतदाख्यातानुषङ्गेणैवाऽर्थपर्यवसानं द्रष्टव्यम् । अतो युक्ताऽर्थवशेन पादव्यवस्था । क्वचिच्च(१) "अग्निः पूर्वेभिर्ऋषिभि" रित्यादौ लघुगुर्वक्षरसाम्याख्यवृत्तवशेन "अग्निमीळे" इत्यादौ चाऽक्षरसङ्ख्यानियमलक्षणछन्दोवशेन, (२)"तमुस्रामिन्द्रं न रेजमान"मित्यादौ चाऽल्पवैषम्येणैव पादव्यवस्था । अत एव सूत्रे अर्थवशग्रहणं वृत्तवशादेरुपलक्षणार्थम् । तदपि च न लक्षणान्तर्गतम्, पादव्यवस्थावन्मन्त्रत्वरूपस्यैव लक्षणस्याऽनतिप्रसक्तत्वात् ॥ ३६ ॥

इत्येकादशं ऋग्लक्षणाधिकरणम् ॥ ११ ॥

अथ द्वादशं सामलक्षणाधिकरणम् ॥ १२ ॥

गीतिषु सामाख्या ॥ २-१-३७ ॥

अत्र 'तेषामि'त्यनुवृत्त्या मन्त्रगतगीतित्वस्य सामशब्दार्थता लभ्यते । अतश्च न लौकिकगीतावतिप्रसङ्गः । अभियुक्तव्यवहाराच्चाऽस्याऽपि शब्दार्थत्वावधारणम् । न चैवं वैदिकगीति(३)विशिष्टमन्त्रेऽभियुक्तप्रयोगान्मन्त्रस्याऽपि वाच्यतापत्तिः, मन्त्राणां व्यक्तिन्यायेन लक्षणयाऽपि भानोपपत्तौ अतिरिक्तशक्तिकल्पने प्रमाणाभावात् । विस्तरेण चैतत्(४)सप्तमे उपपादयिष्यामः । न चैवं पौनरुक्त्यम्, सामश-

१ ऋ. सं. १. १. १. २. ऋ. सं. ७. ६. १.
३ विशिष्टे मन्त्रस्याऽपि वाच्यतापत्तिरिति. ख. पु.
४ पू. मी. ७. २. १.

ब्दस्य गीतिमात्रवाचित्वे तद्विशिष्टमन्त्रवाचित्वे वा, उभयथा ऋग्यजुर्भ्यां(१)विवेकोपपत्तेर्गीतिमात्रवाचित्वस्येहाऽनुपयोगेनाऽवाच्यत्वात्, सप्तम एव ऋगन्तरे अतिदेशसिध्यर्थमवश्यवाच्यत्वात्। इह सप्तमसिद्धस्यैव गीतिमात्रवाचित्वस्य अनागतावेक्षणेन शिष्यहितार्थं कथनेन पौनरुक्त्यानापत्तेः। यथा च तस्य नाऽऽकृत्यधिकरणेन पौनरुक्त्यं, तथा सप्तम एव उपपादयिष्यामः। यत्तु(२) नवमे पुनर्गीतिमात्रवाचित्वकथनं, तदुत्तरविवक्षार्थं(३) स्मरणार्थमिति तत्रैव वक्ष्यते ॥ ३७ ॥

इति द्वादशं सामलक्षणाधिकरणम् ॥ १२ ॥

अथ त्रयोदशं यजुर्लक्षणाधिकरणम् ॥ १३ ॥

शेषे यजुःशब्दः ॥ २-१-३८ ॥

ऋक्सामभिन्नं यत्पश्चिष्टाक्षरमन्त्रजातं तद्यजुः। स्तोभाक्षराणामपि यजुष्ट्वान्नातिव्याप्तिः ॥ ३८ ॥

इति त्रयोदशं यजुर्लक्षणाधिकरणम् ॥ १३ ॥

---

१ विवेकसिद्धेरिति. क. ख. पु. २ पू. मी. ९. २. १.
३ स्मरणमात्रमिति. क. ख. पु.

अथ चतुर्दशं निगदाधिकरणम् ॥ १४ ॥

निगदो वा चतुर्थं स्याद्धर्मविशेषात् ॥ २-१-३९ ॥

(विषयसंशयौ)

'शेषे यजुश्शब्द' इत्येतदाक्षेपेणेदमारभ्यते । सन्ति निगदा नाम प्रायशः परसम्बोधनार्था मन्त्राः 'अग्नीदग्नीन् विहरे'त्यादयः । ते किं यजूंष्येव, उत भिन्ना इति विचारः ।

(पूर्वपक्षः)

तत्र निगदानां यजुष्ट्वे "उपांशु यजुषे"ति वचनेनोपांशुत्वप्राप्तेः "उच्चैर्निगदेने" ति वाक्यविहितोच्चैस्त्वानुपपत्तिः । न च विशेषविहितेन सामान्यविहितस्य बाधः, विशेषविधेस्स्ववि-षयवृत्तिभेदबोधनेनाऽप्युपपत्तौ सामान्यस्याऽपि वाक्यस्य सङ्कोचे प्रमाणाभावात् । न च परप्रत्यायनरूपकार्यानुरोधेनोपांशुत्वविधेस्सङ्कोचादुच्चैर्निगदेने'त्यस्याऽनुवादकत्वोपपत्तेर्न भेदबोधकतेति वाच्यम् । मन्त्रगतालिङ्गप्रमाणकपरप्रत्यायनरूपकार्यानुरोधेन वाक्यस्याऽपि ब्राह्मणगतस्य सङ्कोचायोगात् 'नमः प्रवक्त्रे' (१)'देवेद्धो मन्विद्ध' इत्यादीनां परसम्बोधनार्थत्वस्याऽप्यभावाच्च । सत्यपि परसम्बोधनार्थत्वे उपांशुत्वव्यतिरिक्तमन्द्रादिस्वराणामपि पक्षे प्राप्तत्वादुच्चैस्त्वानुवादानुपपत्तेश्च । अतश्चोच्चैर्निगदेनेत्यस्य विधित्वावश्यंभावाद्भेदबोधनादपि च तदुपपत्तेर्न सामान्यस्याऽपि वाक्यस्य सङ्कोचकल्पनावसरः । तस्मादर्थान्तरं निगदाः । सूत्रं स्पष्टम् ॥ ३९ ॥

---

१ तै. ब्रा. ३. ५. ३.

व्यपदेशाच्च ॥ २-१-४० ॥

इमे निगदाः, इमानि यजूंषीति संज्ञाभेदादपि ज्योतिरादिवद्भेदकतोपपत्तेरर्थान्तरम् । एवञ्च "मन्त्र एव खल्वयं निगदभूतो भवति तस्माद्यजु" रिति सुब्रह्मण्यावाक्यशेषे निगदस्य यजुष्टवसङ्कीर्तनं योगेन यागसाधनत्वमात्रपरम्, सुब्रह्मण्यामात्रस्यैव वा यजुष्टवज्ञापकमिति द्रष्टव्यम् ॥ ४० ॥

यजूंषि वा तद्रूपत्वात् ॥ २-१-४१ ॥

(सिद्धान्तः)

नैतदेवम्, 'अहे बुध्निये' ति मन्त्रे मन्त्रावान्तरभेदानामृगादिमन्त्राणां त्रयाणामेवाऽनुकीर्तनेन निगदस्य भेदेनाऽननुकीर्तनात्, 'मन्त्र एव खल्वयं निगदभूतो भवती'त्यत्र ऋक्सामाभिन्नमन्त्रत्वस्य सुब्रह्मण्यानिगदे यजुष्टवसाधकत्वेनोक्तस्य निगदान्तरेष्वपि सत्त्वाच्च । न चाऽत्र यौगिको यजुश्शब्दः, जपादिसाधनमन्त्रेऽपि प्रश्लिष्टपठिते यजुश्शब्दप्रयोगेण तस्य रूढत्वावगमाद्यौगिकार्थबोधकत्वानुपपत्तेः । तस्माद्यजूरूपप्रत्यभिज्ञानाद्यजुष्टवमेव ॥ ४१ ॥

यत्तु विरुद्धधर्मकत्वाद्भेद इति तत्रोत्तरम्—

वचनाद्धर्मविशेषः ॥ २-१-४२ ॥

(१)"वेदो वा मायदर्शनादि" त्यत्र तृतीये वेदोपक्रमानुरोधेनोच्चैस्त्वादेः ऋग्वेदादिविहितकर्माङ्गमन्त्रमात्राङ्गत्वस्य स्थापयिष्यमाणत्वेन भवन्मतेऽपि 'उच्चैर्निगदेने'त्यस्य 'उपांशु यजुषे'ति

---

१ जै. सू. ३. ३. २.

वाक्यसङ्कोचकत्वावश्यंभावाद्भेदानुमापकत्वानुपपत्तेः, सत्यपि चोच्चैस्त्वादेः ऋगादिधर्मत्वे परप्रत्यायनरूपकार्यानुरोधेनैवोपांशुत्वानुपपत्तेः 'उपांशु यजुषे'त्यस्य निगदविषयत्वानुपपत्तेः, सत्यपि निगदानां यजुष्ट्वे 'उच्चैर्निगदेने'त्यस्य निगदेषु पक्षप्राप्तमन्द्रादिव्यावर्तनफलकोच्चैस्त्वनियामकत्वोपपत्तेर्भेदानुमापकत्वायोगाच्च।

न च लौङ्गिकपरप्रत्यायनार्थत्वस्य ब्राह्मणवाक्यगतेन वाक्यप्रमाणकेनाऽपि बाधशंक्यः, लौङ्गिकस्याऽपि प्रधानभूतस्य परप्रत्यायनस्याऽङ्गभूतेनोपांशुत्वेन बाधायोगात्। उक्तं ह्येतत्(१) प्रमाणबलाबलापेक्षया प्रमेयबलाबलं ज्याय इति। अतश्च लिङ्गेनैव 'उपांशु यजुषे'त्यस्य सङ्कोचितत्वान्न 'उच्चैर्निगदेने'त्यस्य सङ्कोचकता। किंच नाऽवश्यं लिङ्गस्यैव विधिसङ्कोचे व्यापारः, अपि तु विधिवाक्यस्याऽपि स्वनिष्ठगौरवपरिहारार्थं सः।

तथा हि—'उपांशु यजुषे'त्यस्य निगदेष्वत्यन्ताप्राप्तोपांशुताविधायित्वेनाऽपूर्वविधित्वापत्तेः, तस्य चाऽदृष्टोद्देश्यकत्वेन गौरवापत्तिः। पुनश्च निगदभिन्नमन्त्रान्तरे पक्षप्राप्तोपांशुतानियामकत्वेन नियमविधित्वाद्वैरूप्यम्। अतो निगदातिरिक्तेष्वेव दृष्टपदार्थोद्देश्यकतालाघवार्थं स्वरविशेषनियामकत्वाङ्गीकरणात्स्वयमपि विधिस्वसंकोचे व्याप्रियते। अतश्चोपांशुत्वाविषयीभूतेषु निगदेषु 'उच्चैर्निगदेने'त्यनेन स्वरनियमो नाऽनुपपन्नः।

यत्तु मूले 'उच्चैर्निगदेने'त्यस्य परप्रत्यायनरूपकार्यबलप्राप्तोच्चैस्त्वानुवादकत्वमुपांशुत्वविधिप्रशंसाफलकमङ्गीकृतम्, तदतिशयार्थम्, मन्द्रादिस्वरान्तराणामपि पक्षे प्राप्तत्वेन नित्यवदनुवादायोगात्। परप्रत्यायनरूपकार्यरहितानामपि निगदानां स-

१. शिष्टाकोपाधिकरणे (१-३-३)

त्वेन तेषूपांशुत्वस्याऽपि पक्षे प्राप्तया श्रुतरां तदयोगाच्च। न चैवं 'उपांशु यजुषे'त्यत्र वस्तुतो (१)वेदोपक्रमाधिकरणन्यायेन वेदलक्षणावश्निगदपदेऽपि यजुर्वेदलक्षणापत्तेर्यजुर्वेदविहितकर्माङ्गभूतमन्त्रेषूच्चैस्त्वोपांशुत्वविकल्पापत्तेः, वेदोपक्रमस्यैकत्रैव लक्षणातात्पर्यग्राहकत्वेनोपपत्तावुभयत्र तदङ्गीकारे प्रमाणाभावात्। न च नियामकाभावः, 'वायोर्यजुर्वेद' इति यजुःपदसमभिव्याहृतवेदपदोपक्रमस्य यजुःपदलक्षणायामेव तात्पर्यग्राहकत्वेन तदासिद्धेः। अतश्चोपांशुत्वस्य वेदधर्मत्वेऽप्यु 'च्चैर्निगदेने'त्यस्य निरर्थवादकस्यैव निगदमात्रोद्देशेन विशेषविधया पक्षप्राप्तोच्चैस्त्वादिनियामकत्वोपपत्तेर्नाऽनुवादकत्वसम्भवः। अतश्च निगदानां यजूरूपत्वेऽपि परप्रत्यायनरूपकार्यानुरोधेनोपांशुत्वाप्राप्तया तेषूच्चैस्त्वविधानोपपत्तेर्न धर्मविरोधाद्भेदसिद्धिः॥ ४२॥

अर्थाच्च॥ २-१-४३॥

ननु 'अग्नीदग्नीन् विहरे'त्यादेर्लोटः प्राप्तकालतायामप्युपपत्तेः प्रैषत्वनियामकाभावेन परप्रत्यायनार्थत्वाभावान्न वाचनिकोपांशुत्वबाधो युक्त इति चेत्; एवमपि सामान्यविहितोपांशुत्वस्य विशेषविहितेनोच्चैस्त्वेन बाधेऽपि बाधकाभावात्।

वस्तुतस्तु प्राप्तकालत्वे लोटोऽदृष्टार्थत्वापत्तेर्दृष्टार्थत्वानुरोधेन प्रैषत्वावसायाद्युक्त एवोपांशुत्वबोधः॥ ४३॥

यत्तु संज्ञाभेदाद्भेद इत्युक्तं, तत्रोत्तरम्—

गुणार्थो व्यपदेशः॥ २-१-४४॥

---

१. पू. मी. ३. ३. १.

योऽयं यजुष्ट्वे सत्यपि निगदव्यपदेशः, स ब्राह्मणत्वे सत्यपि परिव्राजकत्वव्यपदेशवत्परप्रत्यायनरूपकार्यवशेनोपांशुत्वनिवृत्तौ नितरां गदनरूपगुणयोगेनोपपन्न एव । अत एवोपांशुत्वाभावमात्रकृतप्रकर्षबलेनैव 'उच्चैर्निगदेने'त्येतद्वाक्ये निगदानुवादेनोच्चैस्त्वविधानात्तद्विधेः पूर्वमेव प्रयुज्यमानस्य निगदशब्दस्य शक्यतावच्छेदकावगतिसिद्धिः । अतश्च मूले उच्चैस्त्वरूपप्रकर्षस्य शक्यतावच्छेदकत्वोक्तिरतिशयार्थैव ॥ ४४ ॥

सर्वेषामिति चेत् ॥ २-१-४५ ॥

उपांशुत्वभिन्नस्वरोच्चारणविषयत्वस्यैव निगदपदशक्यतावच्छेदकत्वे ऋच्यपि(१)तत्संभवान्निगदपदप्रयोगापत्तिः । अतो रूढत्वावसायान्निगदयजुस्संज्ञयोर्भेदकत्वं ज्योतिरादिवदुपपन्नमेवेति चेत्—

न ऋग्व्यपदेशात् ॥ २-१-४६ ॥

गदतेरपादबद्धाक्षरसमूहवाचकत्वात् निशब्दस्य च प्रकर्षवाचित्वादवयवयोगेनोपांशुत्वभिन्नस्वरयुक्तापादबद्धमन्त्राक्षरत्वस्यैव शक्यतावच्छेदकत्वप्रतीतेः ऋच्यतिप्रसङ्गाभावेन रूढत्वकल्पने प्रमाणाभावात् । अनेनैवाऽभिप्रायेण "अयाज्या वै निगदाः ऋचैव यजती"ति निगदानां ऋग्भेदव्यपदेशोऽपि सङ्गच्छते । तस्मान्न रूढत्वेन ज्योतिरादिपदवद्भेदकत्वं संज्ञायाः ।

वस्तुतस्तु 'नमः प्रवक्त्र'इत्यादिनिगदेषु वचनेनैवोपांशुत्वप्रतिप्रसवादवयवयोगबाधेनाऽश्वकर्णादिवद्रूढेरावश्यकत्वेऽपि निगदत्वस्याऽखण्डोपाधिरूपस्य यजुष्ट्वावान्तरव्याप्यस्यैव निगद-

१. तत्सद्भावादिति क. पु.

पदशक्यतावच्छेदकत्वेन(१) कल्प्यत्वान्मनुष्यब्राह्मणसंज्ञयोरिव व्याप्यव्यापकभावेन निगदयजुस्संज्ञयोरेकस्मिन्नप्युपपत्तेर्न भेदकत्वापत्तिः । तस्माद्यजुंष्येव निगदा इति सिद्धम् ।

प्रयोजनं वाचस्तोमे "सर्वा ऋचस्सर्वाणि यजूंषि सर्वाणि सामानि पारिप्लवं शंसती"ति विहिते शंसने निगदानां यजुष्ट्वे शंसनम्, भेदे तु नेति द्रष्टव्यम् ॥ ४६ ॥

इति चतुर्दशं निगदाधिकरणम् ॥ १४ ॥

अथ पञ्चदशमेकवाक्यताधिकरणम् ॥ १५ ॥

अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात् ॥ २-१-४७ ॥

तदेवं यजुष्ट्वाश्रये निरूपिते अधुना प्रसङ्गात्तद्यजुष्ट्वं कियत्सु पदसमूहेषु व्यासज्य वर्तते, कियत्सु वा पर्याप्नोतीति विवेकार्थमिदमारभ्यते । यावति पदसमूहे लोके वाक्यत्वप्रसिद्धिः, तावत्येव यजुष्ट्वं, न तु वाक्यसमूहे, तस्यैकार्थ(२)प्रतिपादकत्वाभावेन विनियोगानर्हत्वात् । लोके च यत्रैकार्थकत्वं विभज्यमाने साकाङ्क्षत्वं च तावत्येव वाक्यत्वप्रसिद्धेस्तावत्येव यजुष्ट्वमित्यवगम्यते ।

ननु किमिदमर्थैकत्वम् ? न तावत्पदार्थैकत्वम्, तेषां गामानयेत्यादिवाक्येऽनेकत्वात् । नाऽपि वाक्यार्थैकत्वम्, तस्याऽपि संसर्गरूपत्वेन प्रतिपदार्थं भेदात् । नाऽपि प्रयोजनैकत्वम्, तद्यदि शेषिरूपप्रयोजनैकत्वं विवक्षितं, ततः 'सौर्यं चरुमि'त्यादौ द्रव्य-

१. कल्पनीयत्वादिति क. पु. २. प्रकाशकत्वाभावेनेति क. ख. पु.

देवते प्रति यागः, (१)यागं च प्रति फलमित्यनेकार्थत्वादर्थैकत्वानापत्तिः, "सर्वेभ्यो दर्शपूर्णमासा" वित्यादौ च सा। अथ मुख्यविशेष्यरूपप्रयोजनैकत्वम्, तदापि "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेते" त्यादावाग्नेयादिभावनानां मुख्यविशेष्याणां भिन्नत्वात्तदेकत्वानापत्तिः।

अथ मुख्यविशेष्यप्रतिपादकशब्दैकत्वम्, ततो व्रीहियववाक्ययोः, 'भगो वां विभजत्वि'त्यादौ च तत्प्रतिपादकशब्दभेदेनाऽर्थैकत्वानापत्तेर्विभज्यमानसाकाङ्क्षत्वरूपविशेषणोपादानवैयर्थ्यमिति चेत्–न; भिन्नप्रतीतिविषयानेकमुख्यविशेष्यराहित्यमर्थैकत्वम्। अस्ति च गामानयेत्यादौ तत्, आनयनभावनाया मुख्यविशेष्यभूताया एकत्वात्। अस्ति चेदं दर्शपूर्णमासवाक्येऽपि, अनेकासामप्याग्नेयादिभावनानामेकेन प्रत्ययेनोपादानात् भिन्नप्रतीतिविषयत्वासिद्धेः। व्रीहियवादिवाक्ययोः, 'भगो वां विभजत्वि'त्यादौ च सत्यपि भिन्नप्रतीतिविषयत्वे मुख्यविशेष्यस्य यागविभागभावनादेरेकत्वादर्थैकत्वोपपत्तिः। न ह्यत्र "आयुर्यज्ञेन कल्पताम्, प्राणो यज्ञेन कल्पता"मित्यत्र "क्लृप्तीर्वाचयती"ति बहुवचनवद्विभागभेदे प्रमाणमस्ति, यतोऽर्थभेदश्शङ्क्येत। अतस्सत्यपि व्रीहियववाक्ययोः, "भगो वां विभजतु, अर्यमा वां विभजतु, पूषा वां विभजत्वि"त्यादौ चोक्तविधार्थैकत्वे विभज्यमानसाकाङ्क्षत्वाभावाद्वाक्यभेदसिद्धिः। विभज्यमानसाकाङ्क्षत्वं चाऽन्वीयमानयोः पदार्थयोरनन्वये अनिष्टत्ताकाङ्क्षत्वम्। यथा—गामानयेत्यत्र गोशब्दस्य। न च 'भगो वामि'त्यत्र 'अर्यमा वामि'त्यस्याऽनन्वये साकाङ्क्षत्वमस्ति, स्ववाक्योपात्तविभजत्यन्वयेनैव निराकाङ्क्षत्वात्। अतोऽस्त्येव विभज्यमानसाकाङ्क्षत्वविशेषणसार्थक्यम्।

---

१. तं प्रति चेति क. पु.

अर्थैकत्वविशेषणसार्थक्यं तु "स्योनं ते सदनं कृणोमी" त्यस्याऽपि 'तस्मिन् सीदे'त्यनेनाऽनन्वये तच्छब्दस्य साकाङ्क्षत्वेन विभज्यमानसाकाङ्क्षत्वादेकवाक्यतापत्तेर्द्रष्टव्यम् । तत्र विभज्यमानसाकाङ्क्षत्वेऽप्यर्थैकत्वाभावात् । न हि सदनकरणप्रतिष्ठापनभावनयोरेकपदोपादानमस्ति, येनैकप्रतीतिविषयत्वमाशङ्क्येत । सदनकरणभावनायाः प्रतिष्ठापनभावनायां प्रकारत्वाङ्गीकारेण (१)मुख्यविशेष्यभेदराहित्यशङ्का तु, आख्यातस्वाभाव्येन तस्या अपि मुख्यविशेष्यताप्रतीतेः, तच्छब्दस्य च वाक्यान्तरोपात्तसदनकरणप्रकाशकत्वेनाऽप्युपपत्तेर्वाक्येन लिङ्गबाधायोगादयुक्ता । अतोऽर्थैकत्वाभावादेव तत्रैकवाक्यत्वाभावः । 'देवस्य त्वे'त्यादिवाक्ये तूभयसत्वाद्युक्तं निर्वपामीत्यन्तस्यैकवाक्यत्वम् । अतश्च तावत्येव यजुष्ट्वमपि, तावत एवाऽर्थप्रकाशकत्वेन यागसाधनत्वात् ।

न च न यागसाधनत्वमात्रेण यजुष्ट्वम्, ऋच्यपि तदापत्तेः, जपादिसाधनेषु तदनापत्तेश्च, किन्तु मन्त्रत्वावान्तरधर्मरूपमखण्डं तदित्यङ्गीकर्तव्यम् । तस्य च वेदत्ववत् सर्वमन्त्रेषु व्यासक्तिकल्पनेऽपि यजुरवयवस्यैव विनियोगेन प्रकाशकत्वोपपत्तेर्न यजुष्ट्वस्य पर्याप्तिकल्पने प्रमाणमस्तीति वाच्यम् । 'मन्त्र एव खल्वयं निगदभूतो भवति तस्माद्यजु" रित्यादौ वाक्येऽपि यजुश्शब्दप्रयोगात्पर्याप्तिवृत्तितोपपत्तेः । अन्यथा हि सर्वेषु मन्त्रवाक्येषु व्यासक्ते यजुष्ट्वे एकस्मिन्निगदे यजुरवयवत्वान्न यजुश्शब्दप्रयोगोपपत्तिः । अतो वाक्य एव पर्याप्तं यजुष्ट्वम् । एवं मन्त्रत्वमपि वाक्ये मन्त्रशब्दप्रयोगात्पर्याप्तमेव । वेदत्वं तु एकस्मिन्वाक्ये अधीते वेदोऽधीत इति व्यवहाराभावाद्व्यासज्यवृत्त्येवेति वक्ष्यते । न चैवं मन्त्रत्वयजुष्ट्वयोर्वाक्यमात्रवृत्तित्वे किंचिन्न्यूनेऽपि

१. मुख्यविशेष्यत्वाभावशङ्केति क. पु.

तस्मिन्मन्त्रत्वाद्यनापत्तिः, गोर्गडुनि जाते, विषाणे वा भग्ने गोत्व-प्रत्यभिज्ञाबलेन गोत्ववदिहापि तथाङ्गीकारे बाधकाभावात् । अत एव यत्र न प्रत्यभिज्ञा, यथा श्लोकाद्येकवाक्यतापन्नाद्वित्रि-मन्त्राक्षरेषु, तत्र नैव मन्त्रत्वमित्युक्तं प्राक् । तस्मात्सिद्धं वाक्य-मात्रवृत्ति यजुष्ट्वमिति ।

सूत्रं तु—यद्विभज्यमानसाकाङ्क्षं पदजातं तदर्थैकत्वे सत्येकं वाक्यमित्येव लोके प्रसिद्धिः, अतस्तादृशवाक्यवृत्त्येव यजुष्ट्वमित्येवमध्याहारेण व्याख्येयम् । न तु यथाश्रुतमेव वाक्य-लक्षणपरमेकवाक्यत्वलक्षणपरं वा, पूर्वोक्तमन्त्रप्रस्तावेनाऽसङ्गत-त्वापत्तेः । अतो मन्त्रावान्तरविभागे पूर्वं निरूपिते, अधुना तद-वान्तरभेदरूपस्य यजुषः परिमाणं निरूप्यत इति द्रष्टव्यम् । अत एव ऋक्सामरूपयोस्तदवान्तरभेदयोरध्येतृसिद्धपरिमाणत्वात्तद-निरूपणेऽपि न क्षतिः ॥ ४७ ॥

इति पञ्चदशमेकवाक्यताधिकरणम् ॥ १५ ॥

अथ षोडशं वाक्यभेदाधिकरणम् ॥ १६ ॥

समेषु वाक्यभेदस्स्यात् ॥ २-१-४८ ॥

(विषयसंशयौ)

तदेवं विभज्यमानसाकाङ्क्षत्वविशिष्टार्थैकत्वकृतवाक्यैकत्वेन यजुःपरिमाणे चिन्तिते, अधुना विभज्यमानसाकाङ्क्षत्वादिकमेव कियत्सु पदेषु व्यासक्तमिति विचार्यते । दर्शपूर्णमासयोः "इषे त्वोर्जे त्वा वायव स्थे" त्यादि समाम्नायते । तत्र 'वायव स्थे'-त्यादेस्तावद्वत्सापाकरणे विनियुक्तस्य 'स्थे'तिक्रियापदसत्त्वाद्वायु-

वच्छीघ्रगामिनो भवथ, मातृसमीपं पुनरागामिनो भवथेत्युक्ते चा-ऽर्थादपाकरणप्रतीतेः 'देवस्य त्वे'तिमन्त्रवदेव सुज्ञानं परिमाणम् । 'इषे त्वे' त्यादेस्त्वेकवचनान्तस्य शाखाच्छेदनादौ विनियुक्तस्य 'वायव स्थे'त्यनेनैकवाक्यत्वासम्भवात्ततो भिन्नत्वेनाऽवगतस्याऽपि स्ववाक्ये आख्यातपदाश्रवणान्न सुज्ञानं परिमाणमिति चिन्त्यते-कियदेकं यजुरिति । तथा वाजपेये पठितं "आयुर्यज्ञेन कल्पतां, प्राणो यज्ञेन कल्पतामपानो यज्ञेन कल्पता"मित्यादि । तत्रा-ऽपि कियदेकं यजुरिति चिन्त्यते । तदर्थं चाऽर्थैकत्वविभज्यमान साकाङ्क्षत्वे कियत्सु पर्याप्ते इत्यपि चिन्तनीयम् ।

(पूर्वपक्षः)

तत्र 'इषे त्वे' त्यादावाख्यातपदाश्रवणेऽपि साकाङ्क्षत्वात्तत्ता-वदवश्यं कल्पनीयम् । न च साकाङ्क्षार्थज्ञानस्याऽपि मन्त्रजन्य-स्याऽदृष्टार्थत्वेन जपादिवदुपपत्तेर्नाऽध्याहारावश्यकत्वमिति वा-च्यम् । "इषे त्वेति शाखां च्छिनत्ति, ऊर्जे त्वेत्युन्माष्टी"तीतिकरणेन छेदनाद्यङ्गत्वेन मन्त्रविनियोगान्मन्त्रे इतिकरणावगतकरणत्वस्य चाभिधानं विनाऽनुपपत्तेः छेदनादिप्रकाशकत्वावगमेन छिनद्मी-त्यादिपदाध्याहारावश्यकत्वप्रतीतेः । अतश्चाऽश्रूयमाणस्यैक-स्यैवाऽख्यातस्य कल्पनयैवोपपत्तावनेककल्पने प्रमाणाभावात् 'इषे त्वोर्जे त्वे'ति पदचतुष्टयान्ते एकमेव तदध्याह्रियते । यद्यपि च विनियोगभेदात्पूर्वपक्षेऽपि छिनद्मि, उन्माज्मीत्याद्याख्यातद्वय-कल्पनमावश्यकम्, तथापि 'इषे त्वे'त्यस्य सामर्थ्यात्प्राकरणिक-सर्वयोग्यक्रियार्थत्वस्याऽवगतस्याऽन्यक्रियाविषये बाधेऽप्युन्मा-र्जनविषयेऽपि बाधे प्रमाणाभावेन समस्तस्यैवैकैकत्र विनियो-गावगतेरेकवाक्यत्वोपपत्तिः ।

न च 'ऊर्जे त्वेत्युन्माष्टी'त्यस्यैव पदद्वयमात्रविनियोजकस्य

ब्राह्मणवाक्यस्य सामर्थ्यप्राप्तेषेत्वेति पदद्वयबाधकत्वम्, तस्य प्रतीकग्रहणेनाऽपि समस्तविनियोजकत्वोपपत्तौ सामर्थ्यबाधे प्रमाणाभावात्। न च 'इषे त्वेति शाखां छिनत्ती'त्यस्यादिप्रतीकेन समस्तविनियोजकत्वोपपत्तावप्यूर्जेत्वेत्यस्य कथं मध्यमप्रतीकेन समस्तविनियोजकत्वमिति वाच्यम्, (१)"आनः प्राण एतु परावत आन्तरिक्षादिवस्परि आयुः पार्थिव्या अध्यमृतमसि प्राणाय त्वे"ति मन्त्रस्य(२) "प्राणाय त्वेति हिरण्यमभिव्यनिती"त्यनेनाऽन्तिमप्रतीकेनाऽपि विनियोगस्य सङ्कर्षे वक्ष्यमाणत्वात्, तन्न्यायेनाऽत्र मध्यान्त्यप्रतीकेनाऽपि समस्तविनियोगोपपत्तेः। अतश्च समस्तस्यैकाख्यातकल्पकत्वेनैकार्थत्वात्तस्मिंश्च सर्वेषामन्वये अनिवृत्ताकाङ्क्षत्वेन विभज्यमानसाकाङ्क्षत्वादेकवाक्यतालाभेन यजुष्ट्वोपपत्तिः। क्लृप्त्यादिमन्त्रे तु यद्यपि कल्पतामित्याख्यातं श्रुतम्, तथाऽपि विभागवत्क्लृप्तिभेदे प्रमाणाभावेनैकार्थत्वोपपत्तिः।

न चायुरादिकारकभेदादेव क्लृप्तिभेदः, भगादिवत्तेषां स्वतोऽसमवेतत्वेन स्तुतिमात्रोपयोगितया एकस्यामपि क्रियायां निवेशसंभवेनाऽभेदकत्वात्। न च 'क्लृप्तीर्वाचयती'ति सङ्ख्यया क्लृप्तिभेदः, वाचयतेरुच्चारणानुकूलप्रयोजकव्यापारवाचित्वेन तदन्तर्गत(३)वचनकर्मतया अर्थरूपायाः क्लृप्तेरन्वयायोगेन क्लृप्तिपदस्य कल्पतामिति पदलक्षकत्वावगतेस्सङ्ख्यायास्तन्निष्ठत्वेन क्लृप्तिरूपार्थनिष्ठत्वाभावात्तद्भेदकत्वानुपपत्तेः।

न चैवमेकार्थत्वोपपत्तावपि विभागवदेव विभज्यमानसाकाङ्क्षत्वाभावान्नैकवाक्यत्वोपपत्तिः, एतेषां प्रोत्साहनार्थत्वेन दृष्टार्थानामपि 'क्लृप्तीर्वाचयती'त्यनेन समुच्चयावगमादेकस्मिन्प्रोत्सा-

१. तै. सं. ३.३. ३. २. तै. सं. ३.३. ४. ३. वचिकर्मतयेति क. ख. पु.

ग्निपदं कल्पतामितिपदपरं, तद्घटितमन्त्रपरं वा, लक्षणाप्रसङ्गात्, अपि तु क्लृप्तिरूपार्थपरमेव । न च क्लृप्तिरूपार्थपरत्वे तस्योच्चारणानुकूलव्यापारवाचिवाचयत्यन्तर्गतवचिकर्मत्वानुपपत्तिः, 'वचपरिभाषण' इत्यनुशासनबलेन वचेराभिधानार्थकत्वावसायात्तं प्रत्यर्थस्य कर्मत्वोपपत्तेः । अत एव क्वाचित्को वचेरुच्चारणे प्रयोगो लाक्षणिक इत्यनुसन्धेयम् ।

एवञ्च क्लृप्तिपदस्याऽर्थपरत्वावसायात्तस्याश्च बहुत्वसङ्ख्यया भेदावगतेरर्थभेदोऽप्यत्र सुलभ एव । युक्तश्च(१)उत्तराधिकरणन्यायेन यावत्प्रथमान्तं क्लृप्तिभेद इति, न कपिञ्जलाधिकरणन्यायेन त्रित्वमात्रपर्यवसानाशङ्का । विभागमन्त्रे तु बहुवचनाभावात्कारकभेदस्य च स्वरूपेणाऽसमवायितया एकस्यामपि क्रियायां स्तुतिमात्रार्थत्वेनोपपत्तेर्न भेदकतेति विशेषः । अतश्च 'क्लृप्तीर्वाचयती'त्यस्य क्लृप्तिभेदकतयाऽप्युपपत्तेस्तन्मन्त्रसमुच्चयस्य च मन्त्राणां भिन्नार्थत्वादेव सिद्धेरर्थभेदावगमाद्विभज्यमानसाकाङ्क्षत्वस्य च दूरभ्रष्टत्वाद्वाक्यभेदावगमेन यजुर्भेदोपपत्तिः ।

प्रयोजनम्—प्रथमोदाहरणे स्पष्टमेव । द्वितीये तु यावन्मन्त्रं ऋष्याद्यनुसन्धानम्, एकमन्त्रभ्रेषे वा तन्मात्रोच्चारणं सिद्धान्ते । पूर्वपक्षे तु सकृदेव तदनुसन्धानं समस्तोच्चारणं चेति द्रष्टव्यम् ।

सूत्रं तु—समेष्वन्योन्यनिराकाङ्क्षेषु वाक्यभेदस्यादिति स्पष्टम् ॥ ४८ ॥

इति षोडशं वाक्यभेदाधिकरणम् ॥ १६ ॥

---

१. उत्तरान्यायेनेति. क. ख. पु. उत्तरागोदोहन (११. १. ५.) न्यायेनेत्यर्थः ॥

दाहृते मन्त्रे । तत्र हि "प्राणाय त्वेति हिरण्यमभिव्यनिती"त्युक्ते कथं हिरण्याभिव्यननस्य प्राणप्राप्त्यर्थतेत्यपेक्षिते, परावतो दूरदेशादन्तरिक्षादिवश्च परि सर्वतः प्राणः नः अस्मानागच्छतु, यच्च पृथिव्या अधि उपरि आयुः तदप्यागच्छतु, यतस्तवाऽमृतत्वेन प्राणदानसामर्थ्यादित्यन्योन्याकाङ्क्षत्वं मन्त्रस्वरूपाम्नानवेलायामेव प्रतीयते । अतस्तत्र युक्तो मध्यान्त्यप्रतीकेन विनियोगः । प्रकृते तु मन्त्रस्वरूपालोचनवेलायां 'इषे त्वे'त्यस्योर्जेत्वेत्यनेन निराकाङ्क्षत्वप्रतीतेः पश्चादवगम्यमानो विनियोग एकोऽपि न प्रतीकग्रहणायाऽलम्, पूर्वावगतनैरपेक्ष्यभङ्गापत्तेः । किमुत यदा यथापेक्षितो विनियोगभेद एव स्पष्टतरोऽवधार्यते, तदा कः प्रसङ्गो मध्यान्त्यप्रतीकेन समस्तविनियोगस्य । किञ्चाऽऽख्यातकल्पकतावच्छेदकं तव गुरुभूतम् । पुनश्च कार्यकारणभावद्वयेऽपि कारणतावच्छेदकैक्याद्व्यभिचारप्रसङ्गः ।

यत्तु सामर्थ्यबलेन 'इषे त्वे'त्यस्योन्मार्जनाङ्गत्वावगमात्तदबाधार्थं समस्तविनियोग इत्युक्तम्, तत् सामर्थ्यकल्प्यश्रुतेः पूर्वमेव प्रत्यक्षश्रुत्या छेदनाङ्गत्वेन विनियोगेऽवगते सामर्थ्यस्य श्रुत्यकल्पकत्वादुन्मार्जनाङ्गताबोधकप्रमाणाभावेनोपेक्षणीयम् । तस्मादर्थैकत्वविशिष्टविभज्यमानसाकाङ्क्षत्वाभावात् भिन्नवाक्यतापतीतेर्युक्तो यजुर्भेदः ।

द्वितीयोदाहरणे तु सत्यप्यर्थैकत्वे विभज्यमानसाकाङ्क्षत्वाभावान्न विभागमन्त्रवदेकवाक्यत्वम् । न च 'क्लृप्तीर्वाचयती' त्यनेन सर्वेषां कल्पतामिति पदानां समुच्चयविधानादेकस्मिन् क्लृप्तिप्रकाशने साहित्यावगतेर्विभज्यमानसाकाङ्क्षत्वोपपत्तिः, सकृदुच्चरितस्यैव पदस्य क्लृप्तिबोधजनकत्वेन क्लृप्तिबोधेऽनेकपदसाहित्यस्य बाधितत्वात् । 'क्लृप्तीर्वाचयती'त्यत्र च न क्लृ-

स्निपदं कल्पतामितिपदपरं, तद्घटितमन्त्रपरं वा, लक्षणाप्रसङ्गात्, अपि तु क्लृप्तिरूपार्थपरमेव । न च क्लृप्तिरूपार्थपरत्वे तस्योच्चारणानुकूलव्यापारवाचिवाचयत्यन्तर्गतवचिकर्मत्वानुपपत्तिः, 'वचपरिभाषण' इत्यनुशासनबलेन वचेराभिधानार्थकत्वावसायात्तं प्रत्यर्थस्य कर्मत्वोपपत्तेः । अत एव क्वाचित्को वचेरुच्चारणे प्रयोगो लाक्षणिक इत्यनुसन्धेयम् ।

एवञ्च क्लृप्तिपदस्याऽर्थपरत्वावसायात्तस्याश्च बहुत्वसङ्ख्यया भेदावगतेरर्थभेदोऽप्यत्र सुलभ एव । युक्तश्च(१)उत्तराधिकरणन्यायेन यावत्प्रथमान्तं क्लृप्तिभेद इति, न कपिञ्जलाधिकरणन्यायेन त्रित्वमात्रपर्यवसानाशङ्का । विभागमन्त्रे तु बहुवचनाभावात्कारकभेदस्य च स्वरूपेणाऽसमवायितया एकस्यामपि क्रियायां स्तुतिमात्रार्थत्वेनोपपत्तेर्न भेदकतेति विशेषः । अतश्च 'क्लृप्तीर्वाचयती'त्यस्य क्लृप्तिभेदकतयाऽप्युपपत्तेस्तन्मन्त्रसमुच्चयस्य च मन्त्राणां भिन्नार्थत्वादेव सिद्धेरर्थभेदावगमाद्विभज्यमानसाकाङ्क्षत्वस्य च दूरभ्रष्टत्वाद्वाक्यभेदावगमेन यजुर्भेदोपपत्तिः ।

प्रयोजनम्—प्रथमोदाहरणे स्पष्टमेव । द्वितीये तु यावन्मन्त्रं ऋष्याद्यनुसन्धानम्, एकमन्त्रभ्रेषे वा तन्मात्रोच्चारणं सिद्धान्ते । पूर्वपक्षे तु सकृदेव तदनुसन्धानं समस्तोच्चारणं चेति द्रष्टव्यम् ।

सूत्रं तु—समेष्वन्योन्यनिराकाङ्क्षेषु वाक्यभेदस्यादिति स्पष्टम् ॥ ४८ ॥

इति षोडशं वाक्यभेदाधिकरणम् ॥ १६ ॥

---

१. उत्तरान्यायेनेति. क. ख. पु. उत्तरागोदोहन (११. १. ५.) न्यायेनेत्यर्थः ॥

अथ सप्तदशं अनुषङ्गाधिकरणम् ॥ १७ ॥

अनुषङ्गो वाक्यपरिसमाप्तिस्सर्वेषु तुल्य-योगित्वात् ॥२-१-४९॥

(विषयसंशयौ)

ज्योतिष्टोमे तिसृणामुपसदां द्वितीयतृतीयचतुर्थेष्वहस्सु पूर्वाह्णापराह्णभेदेन द्विरावृत्त्याऽनुष्ठीयमानानां क्रमे संहितायां मन्त्रत्रयमुपसदङ्गभूतोपहोमाङ्गत्वेन समाम्नातम् । तत्राऽऽद्यो(१) "या ते अग्ने अयाशया तनूर्वर्षिष्ठा गह्वरेष्ठोग्रं वचो अपावधीत् त्वेषं वचो अपावधीत्स्वाहे"ति । द्वितीयतृतीयौ तु "या ते अग्ने रजाशया, या ते अग्ने हराशये"ति । एतेषां च मन्त्राणां क्रमणैकैकस्य तत्तदहःक्रियमाणोपसदङ्गभूतहोमाङ्गतेत्यप्यविवादम् । तत्रोत्तरयोर्मन्त्रयोर्यच्छब्दस्त्रीलिङ्गनिर्देशात्स्त्रीवाचकपदसाकाङ्क्षतावगतेरवश्यं कश्चित्तत्परिपूरणसमर्थो वाक्यैकदेशः कल्पनीयः । न चाऽध्ययनविधिनाऽध्ययनोपायनियमात्कथमनधीतस्य (२)तदेकवाक्यत्वोपपत्तिरिति वाच्यम् । तेन प्रत्यक्षपठिते वेदे तन्नियमेऽपि अनधीते प्रवादिपदवदेव वेदैकदेशत्वोपपत्तेः । ततश्चावश्यकल्पनीये वाक्यैकदेशे किं लौकिकोऽध्याहर्तव्यः ? उत वैदिक एव 'तनू'रित्यादिराद्यमन्त्रैकदेशोऽनुषञ्जनीय ? इति सन्देहः ।

(सङ्गतिः)

अत्राऽनुषङ्गपक्षे आम्नानस्य सर्वार्थत्वेनैव साधयिष्यमाण-

---

१. वा. सं. ५. ८. ८. २. तस्य वेदैकवाक्यत्वेति. क. पु.

त्वेनाऽनुषक्तस्याऽऽम्नातत्वेन मन्त्रत्ववद्यजुष्ट्वस्याऽप्युपपत्तेः पूर्व-वद्यजुःपरिमाणचिन्तात्मकत्वेन सङ्गत्युपपत्तिः ।

(पूर्वपक्षः)

तत्र वैदिकशेष आद्यानन्तरपठितत्वादपेक्षितदेशपाठाच्चा-ऽऽद्यस्यैव स्वारस्येन सम्बध्यते, नाऽनन्तरयोरिति तावदाविवाद-म् । अतश्चाऽगृह्यमाणविशेषत्वात्प्रयाजादिवत्सर्वार्थमेवाऽयमाम्ना-त इति नैवाऽऽशङ्कितुं शक्यम् । न च शेषस्याऽऽद्यसम्बन्धेन निरा-काङ्क्षस्याऽप्युत्तरयोस्साकाङ्क्षत्वात्तदन्वयोपपत्तिः, तयोरप्य-निबद्धलौकिकशेषग्रहणेन निराकाङ्क्षयोराद्यमन्त्रमात्रनिबद्धवैदि-कशेषग्रहणानुपपत्तेः । अत एव 'अग्निमुपनिधाय स्तुवीते' त्यस्य लौकिकाग्निग्रहणेनाऽपि निराकाङ्क्षत्वात्कार्यविशेषपुरस्कारेण निबद्धानां वचनव्यतिरेकेणाऽऽयतनाद्बर्हिर्नेतुमशक्यानामाहवनी-यादीनामग्निपदेनाऽग्रहणमिति(१) सप्तमे वक्ष्यते । एवञ्च सत्य-पि यदि लौकिकस्याऽप्रकृतत्वादाग्नेयीमन्त्रन्यायेन प्रकृत-स्यैव वैदिकस्य 'तनू'रित्यादेर्ग्रहणमित्याशङ्क्येत, तत आग्नेयी-मन्त्रस्याऽन्यत्र विनियुक्तस्याऽपि 'कुशा दर्व्यादय' इतिवचना-त्समस्तस्याऽन्यत्र विनियोगे मन्त्रत्वानपायेऽपि मन्त्रैकदेशस्य तनूरित्यादेरन्यत्र नयने मन्त्रत्वानापत्तिः । अतश्चोपस्थितत्वान्म-याऽपि स एव गृह्यते । न त्वेतावता तस्य मन्त्रत्वं यजुष्ट्वं वा शक्यमापादयितुमिति न तद्भ्रंशे यजुर्भ्रंशनिमित्तप्रायश्चित्ताद्या-पत्तिरिति प्राप्ते—

(सिद्धान्तः)

अभिधीयते—वैदिकस्यैव सर्वत्राऽनुषङ्गः, तस्य सर्वार्थमा-

१. पू. मी. ७. ३. १०.

म्नातत्वात् । यथैव हि तनूरित्यादेराद्यमन्त्रसम्बन्धे आकाङ्क्षा-योग्यतासान्निध्यः कारणं, तथैवोत्तरमन्त्रद्वयसम्बन्धेऽपि । तथा हि—आकाङ्क्षा तावद्विशेष्यविषयिण्याद्यस्येवोत्तरयोरप्याविशिष्टा । योग्यता च निराकाङ्क्षीकरणसामर्थ्यरूपा पूर्वस्मिन्निवोत्तरयोरप्याविशिष्टैव । सन्निधिस्तु यद्यप्यानन्तर्यरूपो नाऽविशिष्टः, तथाप्यसम्बन्धिपदाव्यवधानरूपोऽविशिष्ट एव । न ह्यानन्तर्याख्यस्सन्निधिश्शाब्दबोधे कारणम् , तदभावेऽपि देवदत्त गामानयेत्यादौ देवदत्तादिपदानामानयनान्वयदर्शनात् , अपि त्वसम्बन्धिपदाव्यवधानमेव । गोशब्दस्य च सत्यपि व्यवधायकत्वे आनयनान्वयित्वेन(१) नाऽसम्बन्धित्वम् । अतश्च प्रकृतेऽप्याद्य इव द्वितीये तृतीयेऽपि उक्तरूपस्सन्निधिरविशिष्टः ।

न च द्वितीये सन्निध्युपपत्तावपि तृतीये तेनैव व्यवहितत्वात्कथं सन्निधानोपपत्तिरिति वाच्यम् । द्वितीयस्याऽपि शेषान्वययोग्यत्वेन गोपदवदेवाऽसम्बन्धित्वाभावात् । अतश्चाऽसम्बन्धिपदाव्यवधानरूपस्य सन्निधानस्य सर्वेष्वविशेषात्सर्वार्थमाम्नानावगतेस्सर्वसम्बन्धोपपत्तिः । अत एवैकस्यैवाऽव्यवहितानन्तर्यं यथापेक्षितश्च स्वपाठोत्तरकाले पाठोऽप्याकिञ्चित्करः, सर्वमन्त्राव्यवहितानन्तर्यस्य सकृत्पाठेऽशक्यत्वेनाऽऽवृत्तपाठस्य चाऽऽकाङ्क्षादित्रयेणैव सर्वार्थत्वज्ञानोपपत्तेरनर्थकत्वेन सर्वान्तपाठनियमस्य चाऽऽपादयितुमशक्यत्वेनैकाव्यवधानस्याऽवर्जनीयत्वात् , उत्तरयोरपेक्षितदेशोच्चारणस्य लिङ्गेनैव ज्ञातुं शक्यत्वाच्च । ततश्च युक्तमाकाङ्क्षादित्रयसाधारण्यात्सर्वार्थत्वम् ।

न चैवमव्यवधानस्याऽन्वयाप्रयोजकत्वे समानपदप्रत्यासत्त्या यागस्यैव करणत्वोक्तिर्विरुध्येतेति वाच्यम् । अव्यवहिता-

१. असम्बन्धित्वाभावादिति क. ख. पु.

नन्तर्यस्याऽन्वयतात्पर्यग्राहकत्वाभावेऽप्यन्वयनियामकत्वोपपत्तेः। तत्र हि फलनिरूपकत्वं किं यागस्य, उत सोमादेरित्यनियमे प्राप्ते नियामकमात्रं पदप्रत्यासत्तिः । प्रकृते त्वाकाङ्क्षादित्रयसाधारण्यात्सर्वत्र नियमेनैव(१) सम्बन्धप्राप्तेर्नानन्तर्यस्य नियामकत्वोपपत्तिः । न ह्येकस्य नैराकाङ्क्ष्येणेतरयोर्नैराकाङ्क्ष्यं शक्यते वक्तुम् । अतश्च यथैव प्रयाजादीनां सत्यप्याग्नेयाव्यवधाने अग्नीषोमीयादरप्याकाङ्क्षादित्रयसाधारण्यात्सर्वार्थत्वं, एवमिहापि द्रष्टव्यम् । तस्माद्वैदिकस्य सर्वसम्बन्धरूपोऽनुषङ्ग एव युक्तः, न तु क्रमिकान्वयाङ्गीकारेणैकसम्बन्ध एव वैदिकत्वं, इतरसम्बन्धे लौकिकत्वमिति । यतश्शेषान्वयं विना आद्यस्येवोत्तरयोरपि न परिसमाप्तिः, अतस्सर्वेषु तुल्यामनानादनुषङ्ग इति सूत्रार्थः ।

प्रयोजनं तु तद्भेदे यजुर्भेदनिमित्तप्रायश्चित्तप्राप्तिस्स्पष्टैव ॥

(अनुषङ्गाधिकरणवर्णकान्तरम्)

(विषयसंशयौ)

एवं तावदनेकेषामुत्थिताकाङ्क्षाणां सन्निधावाम्नायमानश्शेषस्सर्वत्राऽनुषज्यत इत्युक्तम् । इदानीं तूत्थाप्याकाङ्क्षाणामनेकेषां सन्निधावाम्नायमानश्शेषस्सर्वत्राऽनुषज्यते न वेति विषयव्याप्त्यर्थं तस्मिन्नेव सूत्रे विचार्यते । ज्योतिष्टोमे यजमानपावनार्था मन्त्राः(२) "चित्पतिस्त्वा पुनातु, वाक्पतिस्त्वा पुनातु, देवस्त्वा सविता पुनात्वि" त्येवंविधाः क्रियापदान्तत्वेन स्वतो निराकाङ्क्षाः पठिताः । तेषामन्ते "अच्छिद्रेण पवित्रेण वसोस्सूर्यस्य रश्मिभि"रिति क्रियासाकाङ्क्षश्शेषस्समाम्नातः । स किं अनन्तरेणैव मन्त्रेण सम्बध्यते ? उत सर्वैरपीति विचारः ।

---

१. शेषप्राप्तेरिति. क. पु. २. १. २. १.

(पूर्वपक्षः)

तत्र तेषां तावत्स्वरूपेण निराकाङ्क्षत्वाच्छेषाकाङ्क्षयैवाकाङ्क्षामुत्थाप्य सम्बन्धो वाच्यः । तत्र चैकपदसम्बन्धेनैव(१) निराकाङ्क्षस्य शेषस्येतराकाङ्क्षोत्थापकत्वे प्रमाणाभावान्नियामकापेक्षायां यागादाविवाऽऽनन्तर्यस्य नियामकत्वोपपत्तेर्न सर्वत्राऽनुषङ्गः । न चैवमपि 'यजमानं पावयती'ति विधिना विहितस्यैकस्यैव पावनस्य त्रिभिरपि मन्त्रैः प्रकाशनादच्छिद्रादेश्चाऽपूर्वसाधनीभूतप्रकाश्यमानपावनक्रियाकरणप्रकाशनार्थत्वात्पूर्वमन्त्रयोरप्यन्तिममन्त्रवत्प्रयोगोपपत्तिरिति वाच्यम् ; पावनक्रियैक्येऽपि मन्त्रभेदेन तत्प्रकाशनानां भेदादन्तिमप्रकाशनविषयीभूतपावनक्रियाकरणप्रकाशनार्थस्यैवाऽऽनन्तर्यादवगतत्वेन चित्पत्यादिकर्तृव्यवस्थावदेव करणव्यवस्थाया अप्युपपत्तेः ।

न चाऽत्र मन्त्राणां विकल्पः, येनैकस्मिन्नेव प्रकाशने त्रयाणां करणत्वाद्व्रीहियवयोरिव धर्माणामव्यवस्थापत्तिः, सत्यपि दृष्टार्थत्वे 'त्रिभिर्यजमानं पावयती'ति वचनात् पार्थसारथिमिश्रधृतात्समुच्चयोपपत्तेः । अतश्च विकल्पोक्तिर्याज्ञिकाचारविसंवादिनी वार्तिककारीयाऽतिशयार्थैव । अतश्च सत्यप्यच्छिद्रादेस्सर्वार्थत्वे प्रयाजादिवत्सकृत्प्रयुक्तस्यैव सर्वोपकारकत्वोपपत्तेर्न प्रत्येकं प्रयोगाख्यानुषङ्गोपपत्तिः ।

वस्तुतस्तु बोधायनादिकल्पपर्यालोचनया पावनस्याऽपि मुखनाभिगुल्फप्रदेशभेदेन त्रिरभ्यासादेकैकमन्त्रस्यैकैकाभ्यासकरणत्वावगमादानन्तर्यविशेषेणाऽच्छिद्रादेः गुल्फप्रदेशसंस्कारार्थपावनक्रियाभ्यासप्रकाशकपदैकवाक्यतया विजातीयापूर्वसा-

१. निवृत्ताकाङ्क्षस्येति. क. ख. पु.

धनीभूतपावनक्रियाभ्यासाङ्गत्वावगतेः "पयसा मैत्रावरुणं श्री-णाती" तिवदभ्यासान्तरे प्राप्तयभावाद्ध्रुवस्थोपपत्तिस्सुल-भैव । अतो नेदृशस्थले अनुषङ्ग इति प्राप्ते—

(सिद्धान्तः)

अभिधीयते—आकाङ्क्षादित्रयसाधारण्यदत्रापि सर्वा-थाम्नानावगमेनाऽनुषङ्गेणैव वाक्यपरिसमाप्तिः । तथा हि—सन्निधियोग्यत्वे तावत्पूर्ववदेवाऽविशिष्टे । आकङ्क्षा चाऽपि यथैवाऽन्तिमस्यैतदाकाङ्क्षावशेन कल्प्या, तथैव पू-र्वयोरपि । न ह्यत्रानन्तर्यस्य नियामकता सम्भवति । तत्र हि तन्नियामकं, यत्र तत्प्रवृत्तेः पूर्वं विकल्पेनाऽनेकेषु प्राप्तिः, यथा—प्रतिपदाधिकरणसिद्धान्तरीत्या यागसोमयोः । प्रकृते तूत्थाप्याकाङ्क्षाणामपि तेषां विनिगमनाविरहेण प्रधानत्वात् प्र-तिप्रधानावृत्तिन्यायेन च प्रत्येकं समुच्चेयनैव शेषग्राहित्वागतेर्नि-यामकानाकाङ्क्षत्वान्नाऽऽनन्तर्यस्य तन्नियामकत्वोपपत्तिः । अ तश्च यथैवाऽनेकहविष्कासु विकृतिषु श्रुतानामुपहोमानां विनिग-मनाविरहेण प्रधानत्वेन च सर्वहविर्गतामेवाऽऽकाङ्क्षां प्रकल्प्य समुच्चयेन सर्वार्थतावगतेर्नियामकाकाङ्क्षाविरहेण नाऽऽनन्तर्य-स्य नियामकत्वं, तथैव प्रकृतेऽपीति पूर्ववदेव सर्वार्थमाम्नानावग-तेर्युक्तोऽनुषङ्गः ॥ ४९ ॥

इति सप्तदशमनुषङ्गाधिकरणम् ॥ १७ ॥

अथाऽष्टादशं व्यवायाधिकरणम् ॥ १८ ॥

व्यवायान्नाऽनुषज्येत ॥ २-१-५० ॥

असम्बन्धिपदाव्यवधाने सत्यनुषङ्गे साधिते, यत्राऽसम्बन्धिपदव्यवधानं तत्राऽनुषङ्गो नाऽस्तीति प्रत्युदाहरणार्थमिदं सूत्रम्। यथा—(१)"सन्ते वायुर्वातेन गच्छतां संयजत्रैरङ्गानि संयज्ञपतिराशिषे"त्यत्र 'गच्छताम्'त्यस्य 'अङ्गानी'त्यनेन तावदयोग्यत्वेनाऽसम्बन्धात् असम्बन्धिपद(२)व्यवधानेन 'संयज्ञपतिराशिषे'त्यनेन सत्यपि साकाङ्क्षत्वे योग्यत्वे च, सन्निधानाभावान्नाऽनुषङ्गः। अतः'संयजत्रैरङ्गानी'त्यत्र 'गच्छन्ताम्'त्यस्येव 'सं यज्ञपतिराशिषे'त्यत्राऽपि 'गच्छताम्'ति पदमध्याहर्तव्यम्।

न चाऽनयोस्साकाङ्क्षत्वेऽपि गमनरूपस्यैवाऽर्थस्य योग्यताबललभ्यस्याऽन्वयोपपत्तेः किमर्थं पदाध्याहारकल्पनेति वाच्यम्। तत्तत्पदार्थशाब्दबोधत्वावच्छिन्नं प्रति वृत्तिमत्त्वसम्बन्धेन तत्पदज्ञानस्यैव कारणत्वात्। अन्यथा देवदत्तः पचतीति केनचिदुक्ते प्रत्यक्षदृष्टेनैव कलायेन कर्माकाङ्क्षानिवृत्तेः किं पचतीति प्रश्नानापत्तिः। अस्मन्मते तु कलायोपस्थितावपि तद्वाचकपदस्योद्बोधकाभावादनुपस्थितौ प्रश्नोपपत्तिरिति वैषम्यम्।

किञ्च घटं स्मरेत्यादौ दृश्या घटोपस्थितिवदेकसम्बन्धिदर्शनेनाऽपरसम्बन्धिस्मरणमिति न्यायेन घटपदसमवायिकारणीभूताकाशोपस्थितौ तस्याऽपि स्मरणकर्मत्वेनाऽन्वयापत्तिः। अतोऽवश्यं शाब्दत्वसिध्यर्थं गच्छतामिति पदमेवाऽध्याहृत्योच्चारणीयम्। न चैवं पदाध्याहारोपपत्तावप्यध्याहृतस्य पदस्य ध्यानेनाऽपि स्मरणोपपत्तेर्नाऽवश्यमुच्चारणोपपत्तिः, मन्त्राधिकर-

---

१. तै. सं. १. ३. ८. २. व्यवायेनेति. क. पु.

णोक्तन्यायेन पठितमन्त्रेष्विवाऽध्याहृतमन्त्रेष्वपि प्रयोगसमवेतार्थप्रकाशकेषूच्चारणोपपत्तेः । अतोऽत्र लौकिकत्वाद्रच्छतामिति पदस्य तद्भ्रेषे यजुर्भ्रेषनिमित्तप्रायश्चित्ताभावेऽपि यत्रासम्बन्धिपदाव्यवधानम्, तत्र वैदिकस्याऽनुषङ्गोपपत्तेर्युक्तं तद्भ्रेषे यजुर्भ्रेषप्रायश्चित्तादि । ततश्च तत्राऽनुषक्तस्यैव यजुष्ट्वम् ।

वस्तुतस्तु गमिधातुमात्रस्य द्वितीयमन्त्रेऽप्यनुषङ्गसम्भवेन तृतीये संबन्धोपपत्तेः प्रत्युदाहरणेऽपि प्रत्ययमात्रस्यैव व्यवायादनुषङ्गो निराकर्तव्यः । न चैकपदत्वात्प्रत्यये(१)ऽननुषङ्गापत्तिः, प्रत्ययमात्रोहे प्रकृतेरार्षत्ववत्तस्याऽनुषङ्गे बाधकाभावात् । अत एवेदृशविषये विपरिणतानुषङ्गमाचक्षते वृद्धाः । तेन प्रत्ययरहितस्यैव यजुष्ट्वमिति सिद्धम् ॥ ५० ॥

इत्यष्टादशं व्यवायाधिकरणम् ॥ १८ ॥

मीमांसाम्बुनिधिं प्रमथ्य विविधन्यायोच्चयैर्निर्झरैः
कृत्वा जैमिनिसूत्रमन्दरमसुं वेदं तथा वासुकिम् ।
यद्बालाहलसंज्ञमेव कलितं ग्रन्थान्तरं सज्जनैः
श्रीकृष्णस्य तु भूषणाय स परं यः कौस्तुभाख्यो मणिः ॥

इति पूर्वोत्तरमीमांसापारावारपारीण श्रीरुद्रदेवसूनोः खण्डदेवस्य कृतौ मीमांसाकौस्तुभे द्वितीयाध्यायस्य प्रथमः पादः ॥ १ ॥



१. अनुषङ्गानुपपत्तिरिति. क. पु.

श्रीः ।

मीमांसाकौस्तुभः ॥

(द्वितीयाध्यायस्य द्वितीयः पादः)

प्रथमं शब्दान्तराधिकरणम् ॥ १ ॥

शब्दान्तरे कर्मभेदः कृतानुबन्धत्वात् ॥ २-२-१ ॥

(विषयसंशयसङ्गतयः)

एवमुपोद्घातप्रसक्ते मन्त्रलक्षणादौ समाप्ते 'यत्प्रसङ्गेन यदागतं तत्समाप्तौ तत् बुद्धिस्थं जायत' इति न्यायेन भावार्थाधिकरणोक्तधात्वर्थकरणत्वस्योपस्थितेः तस्य चाऽपूर्वभेदसिद्धिद्वारा भावनाभेदसिध्यर्थत्वस्योक्तत्वादिदानीमवसरप्राप्तो लक्षणार्थभूतो भावनाभेद एव शब्दान्तरादिप्रमाणैः प्रतिपाद्यते । तत्राऽपि शब्दान्तरस्य प्रमाणान्तरसिद्धधात्वर्थभेदोपजीवित्वेन भावनाभेदमात्रे व्यापारात् सूचीकटाहन्यायेन प्रथमं तस्यैव भेदकता निरूप्यते । ज्योतिष्टोमेन स्वर्गकामो यजेते'ति प्रकृत्य 'सोमेन यजेत' (१)'दाक्षिणानि जुहोति' (२)'हिरण्यमात्रेयाय ददाती'त्यादि श्रुतम् । तत्र यागदानहोमादिसकलप्रकृतधात्वर्थानुरक्ता एका भावना ? अथ वा प्रतिधात्वर्थं भावनाभेदः ? इति विचारः । अत्र च प्रकरणान्तरातिरिक्तसकलभेदकप्रमाणनिरूपणस्य पादार्थत्वात् पादाध्यायसङ्गतिः स्पष्टा ।

(पूर्वपक्षः)

तत्र लाघवादेकैव भावना । न च तद्वाचकतिप्प्रत्ययाभ्यासात्

---

१. आप. श्रौ १३. ५. ६. २. आप. श्रौ. १३. ६. १२.

भेदः, तस्य धात्वर्थविधानार्थमनुवादकत्वाभ्युपगमेनाऽनन्यपरत्वाभावात् । न चैवमप्येकेन वाक्येन भावनाविधौ तद्वाक्यस्थस्य धात्वर्थस्य, गुणादेर्वा उत्पत्तिशिष्टत्वेन वाक्यान्तरविहितोत्पन्नशिष्टधात्वर्थान्तरादिनिवेशानुपपत्तेर्गुणाङ्गेदापत्तिः, फलवाक्ये स्वर्गोद्देशेन शुद्धभावनाविधेयङ्गीकारेण तदनुवादेन सोमादिवाक्यैर्गुणविशिष्टधात्वर्थविधेयभ्युपगमे सर्वेषामुत्पन्नशिष्टत्वेन (१)गुणन्यायानवतारात् । न च फलवाक्येऽपि धातूपादानान्न शुद्धभावनाविधिः शक्यः, विशिष्टविधिगौरवापत्त्या फलवाक्यस्थस्य यजेरवयुत्यानुवादकत्वेन, प्रकृतधात्वर्थमात्रोपलक्षणत्वेन वा साधुत्वार्थमनुवादकतया विधेयार्थकत्वाभावात् ।

न च फलानुकूलव्यापारसामान्यस्य लोकत एव प्राप्तत्वात् धात्वर्थविशेषावच्छिन्नस्य च तव विधेयत्वेनाऽनिष्टत्वात् कथं शुद्धभावनाविधानोपपत्तिः ? स्वर्गस्य जन्यत्वेन तदनुकूले व्यापारसामान्ये लोकतोऽवगतेऽपि तदुद्देश्यकस्य पुरुषनिष्ठयत्नरूपव्यापारस्य नियमेनाऽनाक्षेपात्तद्विधानोपपत्तेः, पुत्रादौ यत्नस्याप्यवगमेऽपि तद्गतवैजात्यस्याऽनवगमात्तद्विधानोपपत्तेश्च । न च 'प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूत' इत्यनुशासनेन प्रत्ययानां नियमेन प्रकृत्यर्थान्वितस्वार्थबोधकत्वावगतेः शुद्धभावनाविधानानुपपत्तिः । वस्तुतो धात्वर्थावच्छिन्नभावनाभिधानेऽपि धात्वर्थावच्छेदस्य प्रमाणान्तरप्राप्तत्वात् विशेष्यमात्रांशे विधिफलोपपत्तेः । अत एव गुणफलस्थले धात्वर्थावच्छेदकत्वस्य प्रकरणप्राप्तत्वेऽपि भावनामात्रविधिराश्रितः । अतश्च यजिपदस्य प्रमाणान्तरानुरोधेन प्रकृतसर्वधात्वर्थपरत्वावगतेः तत्समानाधिकरणस्य ज्योतिष्टोमपदस्याऽपि एकदेशप्रवृत्तिनिमित्तेन सर्वनामधेय-

१. पू. मी. २. २. ९.

त्वापत्तिः । एवञ्च फलवाक्ये शुद्धभावनाविधानेऽवगते सोमादि-वाक्यस्थातिप्रत्ययेन प्रत्येकं तामनूद्य तत्करणतया सोमादि-विशिष्टधात्वर्थविधानोपपत्तेः, सर्वेषाञ्चोत्पन्नशिष्टत्वेन गुणन्या-यासावात् भेदकप्रमाणाभावेन भावनैकत्वसिद्धिः । एवञ्च तत्त-द्वाक्ये निरपेक्षतया तत्तद्धात्वर्थानामेकफलभावनाकरणत्वावग-मेन विकल्पोपपत्तेरेकजातीयस्यैवाऽपूर्वस्य तृणारणिमणिन्या-येन सकलजन्यत्वोपपत्तेः तद्वैजात्यकल्पनाभावादपि लाघवम् । अस्तु वा व्यभिचारपरिहारार्थं तद्भेदोऽपि, न चैतावता भावना-भेदः । न च भेदकान्तराभावेऽपि अवच्छेदकीभूतधात्वर्थभेदरू-पाच्छब्दान्तरादेव भेदोपपत्तिः, समूहालम्बनस्थले एकस्मिन्नेव ज्ञाने घटपटादीनामनेकेषां विषयतासम्बन्धेनाऽवच्छेदकत्ववदे-कस्यामेव कृतौ सर्वेषां धात्वर्थानां साहित्येनाऽवच्छेदकत्वोपप-त्तेः । अस्तु वा एकस्यां भावनायां वैकल्पिका सर्वेषामवच्छेद-कता, सर्वथा सिद्धं भावनैकत्वम् ।

यत्त्वत्र भाष्यकारेण यागदानहोमानां स्वत्वत्यागांशेन एकत्वादवच्छेदकीभूतधात्वर्थस्याऽप्येकत्वमित्युक्तम्, तत् स्व-त्वत्यागांशस्यैक्येऽपि परस्वत्वापादनप्रक्षेपांशयोराधिक्येन धा-त्वर्थैक्यानुपपत्तेरतिशयार्थम् । किञ्चैवं ददातिवाक्ये प्राप्तकर्मा-नुवादेन हिरण्यान्नेयरूपानेकगुणविधाने वाक्यभेदप्रसङ्गादवश्य-मुभयविशिष्टकर्मविधानावगतेः धात्वर्थैक्योक्तिरसम्बद्धैव । तथा 'दाक्षिणानि जुहोती'त्यत्राऽपि जुहोतिलक्षितयागानुवादेन वि-धेयस्य गुणस्याऽभावात् धात्वर्थविधानावश्यकत्वेन तदैक्योक्ति-रसम्बद्धा ।

न च दाक्षिणपदेन दक्षिणाकालरूपगुणविधिः, दाक्षिणा-नीति तद्धितस्य कालार्थे स्मरणाभावेन कालविधौ प्रमाणाभा-

वात्। दक्षिणायास्तु यागाङ्गत्वेन प्राप्तत्वादेव विधिरनाशङ्क्यः। अतो विधेयान्तराभावेन कर्मविध्यवश्यम्भावे पाठप्राप्तदक्षिणोत्तरकालतारूपप्रवृत्तिनिमित्तेन दाक्षिणशब्दो नामधेयम्। अतश्च धात्वर्थैक्यस्य बाधितत्वात् सत्यपि धात्वर्थभेदे भावनाया ऐक्यमिति प्राप्ते—

(सिद्धान्तः)

उच्यते--यत्राऽपर्यायधातुभेदरूपं शब्दान्तरम्, तत्राऽवश्यं भावनारूपकर्मभेदः प्रत्येतव्यः। तथा हि--भावना तावत् कृतिस्साविषया, कृतिविषयत्वमपि न ज्ञानविषयत्वादिवत् सिद्धपदार्थवृत्ति, अपि तु साध्यमात्रवृत्तित्वात् तज्जन्यत्वापरपर्यायम्। अतश्च फलवाक्यविहिताया अपि कृतेर्विषयापेक्षायां सोमादिवाक्यविहितो यागादिरेव साध्यत्वात् जन्यत्वेन सम्बध्यत इत्यभ्युपगन्तव्यम्। तत्र च कार्यतावच्छेदकस्य यागत्वादेर्भेदात् कारणीभूतायां कृतावपि वैजात्यमावश्यकमेव। न च तत्तत्कार्यतावच्छेदकावच्छिन्नं प्रति यत्नत्वेनैव कारणताऽस्तु, होमोत्पत्तिदशायां यागोत्पत्तिप्रसक्तिस्तु विजातीयादृष्टरूपसामग्र्यभावादेव निराकर्तव्येति वाच्यम्। विजातीयादृष्टस्य कारणत्वकल्पने प्रमाणाभावात्, अन्यथा तन्मात्रादेव कार्यमात्रोत्पत्युपपत्तौ कारणमात्रोच्छेदापत्तेः, अदृष्टगतवैजात्यकल्पनापेक्षयोपस्थितकृतावेव वैजात्यस्य कल्पयितुं युक्तत्वाच्च। एवञ्च कार्यमात्रवृत्तिजातेः किञ्चित्प्रति कार्यतावच्छेदकत्वनियमोऽप्यनुगृहीतो भवति।

न चैवं ईश्वरकृतौ कार्यद्वयजनकतावच्छेदकजातिद्वयसत्त्वात्साङ्कर्यापत्तिः, ईश्वरकृतेरेवाऽनङ्गीकारात्। एवं सत्यपि यदि सकलपाकरणिकधात्वर्थवृत्त्याधिश्रयणफूत्कारादिवृत्तिपाकत्वमिव व्यापकसामान्यमेव कार्यतावच्छेदकतया केनचित्पदेनोपा-

त्तं स्यात्, ततो भवेत्कार्यतावच्छेदकैक्येन कारणीभूतभावनैक्यम्, न च प्रकृते तदस्ति, सोमादिवाक्यैर्यागत्वादिनैव तत्तद्धात्वर्थोपस्थितेः । अतश्च तत्तत्कार्यतावच्छेदकवाचिधातुपदभेदाद्युक्त एव कारणीभूतभावनाभेदः ।

न चैवमपि सोमादिवाक्ये यागादेः फलभावनाकरणत्वस्यैव (१)शाब्दत्वादार्थिककर्मतादशायां च कल्पनालाघवानुरोधेनैकस्यैव व्यापकधर्मस्य कार्यतावच्छेदकत्वकल्पनोपपत्तेः कथं तद्भेदेन भावनाभेद इति वाच्यम् ? शाब्दस्य करणत्वस्य शब्दभेदेन भिन्नत्वात् तदन्यथानुपपत्तिकल्पितस्य कर्मत्वस्याऽपि कल्पकभेदेन भेदोपपत्तेः। अनयैव च दिशा 'तिस्र आहुतीर्जुहोती'त्यादावपि भावनाभेदो बोध्यः, मूलोक्तरीत्या तदसिद्धेरिति ध्येयम्। अतश्च भावनाभेदावश्यकत्वेन तत्तद्वाक्यैरेव तत्तद्वाक्योपात्तसकलकारकविशिष्टभावनाविधानमित्यङ्गीकर्तव्यम्, न तु फलवाक्य एवाऽनेकभावनाविधानम्, इतरैस्तु एकैकभावनानुवादेन तत्तद्धात्वर्थविधिरिति । फलवाक्ये भावनानेकत्वग्राहकप्रमाणानुपस्थितेः तद्वाक्यस्थयजेस्सर्वोपलक्षणार्थत्वे प्रमाणाभावाच्च, ज्योतिष्टोमपदे एकदेशप्रवृत्तिनिमित्तत्वाङ्गीकारस्याऽयुक्तत्वाच्च । अतश्च तत्तद्वाक्येनैव तत्तद्धात्वर्थविशिष्टभावनाविधानमङ्गीकृत्य फलवाक्ये लाघवात्फलसम्बन्धमात्रविधानम् । तदपि च ज्योतिष्टोमपदानुरोधात्(२) चातुर्थिकन्यायेन सोमद्रव्यकयागस्यैव ।

न चाऽस्तु तर्हि फलवाक्य एव 'उद्भिदा यजेते'तिवद्यागकरणिकभावनायाः फलोद्देशेन विधिः, सोमवाक्ये तु मत्वर्थलक्षणाविशिष्टविधिगौरवभिया यागकर्मकभावनानुवादेन सोममात्रविधिरिति वाच्यम् । फलवाक्ये दीक्षणीयादिप्राकरणिकयागानामेव राजसू-

१. शाब्दत्वेनेति क. पु. २. पू. मी. ४. ४. १२.

यवत् फलसम्बन्धापत्त्या तत्र तदपेक्षया कर्मान्तरविधाने प्रमाणाभावात् ज्योतिष्टोमपदस्य चौत्तरकालिकाङ्गत्वरूपसम्बन्धमादायैव सर्वपरत्वोपपत्तेः । न चेष्टापत्तिः, तथात्वे दीक्षणीयादिवाक्ये उत्पत्तिशिष्टद्रव्यावरोधेन तत्र सोमविधानानुपपत्तौ सोमवाक्ये गुणात् सोमविशिष्टकर्मान्तरविधानस्याऽवश्यकत्वात् । अतश्च युक्तं चातुर्थिकन्यायेन तस्यैव फलसम्बन्धविधानमिति सिद्धो धात्वर्थभेदेन भावनाभेदः ।

किञ्च यत्र संज्ञोपपदयुक्ताख्यातश्रवणं तत्र फलवाक्ये प्राप्तभावनानुवादेन धात्वर्थमात्रविधानोपपत्तावपि गुणोपपदयुक्ते सोमादिवाक्ये सोमधात्वर्थरूपानेककारकविधाने वाक्यभेदस्तदवस्थ एव । न च सोमविशिष्टयागविधानान्न वाक्यभेदः, यागस्याऽपि कारकत्वाविशेषेण गुणविशिष्टगुणान्तरविध्ययोगवत् गुणविशिष्टधात्वर्थस्य विध्ययोगस्याऽपि तुल्यत्वात् । अतश्च सर्वेषामपि प्रथमतो भावनायामेवाऽन्वयमङ्गीकृत्य तस्या एव विशिष्टाया विधिरङ्गीकर्तव्यः, तस्य च त्वयाऽनङ्गीकरणात् फलवाक्यप्राप्तभावनानुवादेनोभयविधौ च वाक्यभेदो दुरपह्नवः । अतस्सिद्धमपर्यायधातुभेदरूपाच्छब्दान्तरात् कार्यतावच्छेदकभेदेन कार्यभेदावगतौ कारणीभूताया भावनाया वैजात्यमिति ।

प्रयोजनम्–पूर्वपक्षे सर्वेषां धात्वर्थानां समप्राधान्यं विकल्पश्च । सिद्धान्ते तु सोमयागस्यैव प्राधान्यम्, अन्येषां तदङ्गत्वान्न विकल्पः ।

सूत्रं तु–उक्तविधे शब्दान्तरे भावनारूपकर्मभेदः प्रत्येतव्यः, कार्यकारणयोरेकवैजात्येनाऽपरवैजात्यरूपानुबन्धस्य कृतत्वादिति व्याख्येयम् ॥

इति प्रथमं शब्दान्तराधिकरणम् ॥ १ ॥

अथ द्वितीयमभ्यासाधिकरणम् ॥ २ ॥

एकस्यैवं पुनःश्रुतिरविशेषादनर्थकं हि स्यात् ॥ २-२-२ ॥

(विषयसंशयौ)

इदानीमभ्यासाद्भेदोऽभिधीयते। दर्शपूर्णमासयोः(१) 'समिधो यजति, तनूनपातं यजति, इडो यजति, बर्हिर्यजति, स्वाहाकारं यजती'ति पञ्चकृत्वो यजतिपदमभ्यस्तं श्रुतम्। तत्र किमेको यागः ? उत प्रत्यभ्यासं यागभेदः ? इति विचारः। यागैकत्वे भावनापूर्वयोरप्येकत्वम्, तद्भेदेऽर्थान्तरपरधातूच्चारणभेदात् शब्दान्तराधिकरणन्यायेनैव भावनाभेदसिद्धिः, अपूर्वाधिकरणोक्तन्यायेन चाऽपूर्वभेदसिद्धिः। यद्यपि चाऽभ्यासाद्यागभेदवद्भावनाभेदोऽपि शक्यते वक्तुम्, तथाऽपि शब्दान्तरेणाऽपि तत्सम्भवादसाधारण्याभावेन नोपन्यस्तः।

(सङ्गतिः)

अत्र च धात्वर्थभेदमात्रस्यैव विवक्षितविवेकेन निरूपणीयत्वेऽप्यध्यायार्थरूपभावनाभेदसिध्यर्थत्वादध्यायसङ्गत्यविरोधः। एवं सङ्ख्याद्यधिकरणेष्वपि द्रष्टव्यम्। पादसङ्गतिस्तु स्पष्टैव। अनन्तरा तु पूर्वाधिकरणे सत्यप्याख्यातैक्येन भावनाप्रत्यभिज्ञाने धातुभेदेन तदर्थभेदाद्युक्तो भावनाभेदः, प्रकृते तु धातोरप्येकत्वेन तद्भेदे प्रमाणाभाव इति पूर्वपक्षोत्थानादुद्दृष्टव्या।

(पूर्वपक्षः)

तत्र धातुस्तावत् स एवेति दृढतरप्रत्यभिज्ञयाऽवगम्यत इ-

---

१. तै. सं. २. ६. १.

त्यविवादम्। अतस्तदर्थोऽप्येक एव। न च पुनरुच्चारणाद्भेदस्तस्य, लोके पटः पट इत्यादौ शतश उच्चारितोऽपि भेदाप्रतीतेः। प्रत्युत प्रत्यभिज्ञापकत्वेनाऽभेदसाधकतया विरुद्धत्वात्। न च पुनःश्रुतिमात्रस्याऽभेदसाधकत्वेऽपि विधिपुनःश्रुतिः स्वसमभिव्याहृतार्थे विहितविधानायोगेन भेदसाधकत्वान्न विरुध्यत इति वाच्यम्। उपक्रमस्थयजिपुनःश्रुतिबलेनैकवाक्यतालाभाय च 'एकं वृणीते द्वौ वृणीते' इतिवत् 'तनूनपातं यजती'त्यादौ लडन्तत्वस्याऽपि सम्भवेन विधिपुनःश्रुतेरेवाऽसिद्धेः। अतश्च(१) तद्वदेवाऽयमेकस्याऽर्थवाद इति नाऽनर्थक्यप्रतिहतत्वेनाऽपि विधिपुनःश्रुतेर्भेदकता।

अस्तु वा(२) 'समिधो यजति वसन्तमेवर्तूनामवरुन्धे' 'तनूनपातं यजति ग्रीष्ममेवाऽवरुन्धे' इत्यादिपृथगर्थवादान्नानाऽस्निस्सन्दिग्धगुणाविधिव्यवहितत्वाच्च 'तनूनपातं यजती' त्यादिरपि विधिः, तथाऽपि 'दध्ना जुहोती' त्यादिवत् गुणसङ्क्रान्तशक्तिकत्वात् विधेर्धात्वर्थभावनाविषयत्वाभावेन न तद्भेदकत्वापत्तिः; सर्वत्र हि समिदादिपदानां द्वितीयान्तानामपि 'विष्णुं यजती' तिवदेवतापरत्वमेवाऽवगम्यते, न तु नामधेयत्वम्, येन तस्याऽविधेयत्वाद्विधिर्धात्वर्थभावनाविषय एव 'अग्निहोत्रं जुहोती' तिवद्व्याप्रियेत, तेषां तूभयत्र तुल्यवद्वृत्तिकत्वाभावेन नामधेयन्यायाविषयत्वात्।

न च न्यायान्तराविषयत्वेऽपि समिदादिदेवतानां(३) याज्यामन्त्रवर्णैरेव सम्भवत्प्राप्तिकत्वात् 'अग्निहोत्रं जुहोती'तिवत्तत्परख्यन्यायविषयत्वोपपत्तिः,(४) 'वसन्तमृतूनां प्रीणामी' त्याद्यनुमन्त्रणमन्त्रैः

---

१. अयं च विषयः (६. १. १०.) अधिकरणे द्रष्टव्यः।
२. तै. सं. २. ६. १.
३. समिधस्समिधोऽग्न आजस्य वियन्तु इत्यादयो मन्त्रवर्णाः।
४. तै. सं. १. ६. २.

वसन्तादिदेवतानामपि प्राप्तिसम्भवेन समिदादीनां नित्यप्राप्त्यभावात्। अतो वसन्तादिमान्त्रवर्णिकदेवताव्याप्तिफलकस्य समिदादिनियमस्याऽप्राप्तत्वेन विधिवाक्यैर्विधानोपपत्तेः नामधेयत्वासम्भवाद्विधायकस्य गुणसङ्क्रान्तशक्तित्वेन धात्वर्थभावनाविषयत्वाभावान्न तद्भेदकत्वम्। न चैवं कर्मोत्पत्तिवाक्यस्थदेवताविरोधात् कथमुत्पन्नवाक्यस्थदेवतान्तरविधानोपपत्तिः, कर्मोत्पत्तिवाक्यस्थोपपदस्य नामत्वाङ्गीकारात्, अत एव न गुणाङ्गेदशङ्का। न चैवमपि विनिगमनाविरहः, प्राथमिकत्वेन समिद्वाक्ये कर्मविधिरितरत्र गुणविधिस्तदनुवादेनेति विनिगन्तुं शक्यत्वादिति पार्थसारथिभवदेवश्च।

वस्तुतस्तु समित्पदस्याऽपि नामधेयत्वं नोद्भिन्न्यायासिद्धम्, उभयत्र तुल्यवद्वृत्तिकत्वाभावात्। वाक्यभेदतद्व्यपदेशौ तु नाशङ्कनीयावेव। तत्प्रख्यन्यायोऽपि नियमस्याऽप्राप्तत्वादनुपपन्नः, देवतामात्रप्राप्त्या तदुपपादनं तु तनूनपातादिपदेष्वप्यविशिष्टम्। अतो न समित्पदमात्रस्य नामधेयत्वाभिधानं युज्यते। तस्मादेवं परिहर्तव्यम्—स्वाहाकारवाक्ये कर्मविधिः, तत्रत्यस्वाहाकारपदस्य नामधेयत्वात्। न हि तत्र स्वाहाकारपदं स्वाहाकाररूपदेवताविधायकम्, तस्य णमुलन्तत्वस्याऽपि सम्भवेन द्वितीयान्ततत्वस्यैव नियामकाभावात् देवताविध्यप्रतीतेः, मन्त्रतः पक्षे स्वाहाकारदेवताया अप्राप्तत्वेनाऽपूर्वायाः स्वाहाकारदेवताया विधौ गौरवाच्च। नाऽपि स्वाहाकारशब्दमात्रविधिः, णमुलन्तत्वस्याऽपि संशयितत्वेन तद्दोषतादवस्थ्यात्, स्वाहाकारशब्दस्य मन्त्रवर्णान्नित्यप्राप्तत्वेन नियमविधेरप्यनाशङ्कनीयत्वाच्च। अतोऽसौ तत्प्रख्यन्यायेन नामधेयमिति तत्रैव कर्मविधिः। इतरे तु तदनुवादेन वैकल्पिकदेवताविधयः। अस्मिंश्च पक्षे(१) 'स्वाहाऽग्निम्,

१. तै. ब्रा. ३. ५ ५.।

स्वाहा सोम' मित्यादिमन्त्रो मुख्यलिङ्गकर्मैकान्त्रान्तरैर्याज्याकार्ये बाधितेऽपि महाप्रकरणसहकृतालिङ्गात्साङ्गप्रधानदेवताप्रकाशनार्थस्सन् 'स्वाहा देवां आज्यपाँ' इत्यादिना प्रयाजदेवतायां अपि प्रकाशितत्वात्तदङ्गमपि भवत्येवेति नैतस्य प्रधानमात्राङ्गत्वापत्त्या प्रयाजे स्वाहाशब्दस्याऽप्राप्तत्वात् तत्प्रख्यन्यायविघातशङ्का:। अतः समिदादिवाक्यानां तत्रैव देवताविधायकत्वोपपत्तेर्विधिपुनःश्रवणस्य धात्वर्थविषयत्वाभावात् न तद्भेदकत्वोपपत्तिः।

अस्तु वोपांशुयागोत्पत्तिवाक्ये देवताभावात्तदनुवादेन समिदादिवाक्येषु पञ्चस्वपि देवताविधिः, तत्क्रमान्नातविष्ण्वादिदेवत्ययाज्यानुवाक्यायुगलानां तु क्रमं बाधित्वा समाख्यासहकृतलिङ्गेनोत्कर्ष इति भवदेवोक्तः पक्षः। अस्तु वा वक्ष्यमाणसिद्धान्तरीत्यैव समिदादीनां पञ्चानामपि नामधेयत्वम्, तथाऽपि प्राथमिकत्वेन समिद्वाक्य एव कर्मविधिः, इतरे तु तस्यैव कर्मणोऽभ्यासविधायकाः,(१)'तेन पुनर्यजेतेतिवत्'। न तु कर्मान्तरविधायकाः, प्रकृतप्रत्यभिज्ञाबाधप्रसङ्गात्। अस्मिंश्च पक्षे 'अतिहायेडो बर्हिः प्रतिसमानयते' 'चतुर्दश पौर्णमास्यामाहुतयः'इत्यादिसमुच्चयज्ञापकान्युपपन्नानि भवन्ति। न चैवं संज्ञातो भेदापत्तिः, तस्याऽप्यभ्यासाभिप्रायेणैवोपपत्तेः। अतस्सिद्धं कर्मैकत्वमिति प्राप्ते—

(सिद्धान्तः)

अभिधीयते—सत्यपि लेट्लट्सन्देहे विध्यन्तरैकवाक्यत्वाभावात्,स्वतन्त्रानुवादमात्रत्वे त्वानर्थक्यापत्तेः, निस्सन्दिग्धगुणविधिव्यवहितत्वाच्च एतेषामेव मध्ये कस्य चिद्विधित्वमितरे

---

१. यद्युद्गाता अपच्छिन्द्याद्दक्षिणं तं यज्ञमिष्ट्वातेन पुनर्यजेते' त्यत्र दक्षिणां विना समापितस्यैव प्रथमप्रयोगस्य 'तेन पुनर्यजेते'त्यनेनाऽभ्यासविधिः तद्वदित्यर्थः।

तदर्थवादा इति शङ्कानुपपत्तेः, सर्वेऽपि तावद्विधय इत्यविवादः। तत्र समानाभिधानश्रुत्या समानपदश्रुत्या च विधिर्धात्वर्थभावनयोरेव व्याप्रियते, न तूपपदार्थं (१)इत्ययमप्युत्सर्गः, प्रथमविधिप्रकाराङ्गीकारात् । तच्चेदं तदा बाध्येत यदि दध्यादिवदुपपदार्थोऽनन्यगतिः स्यात् । तथा हि—विधिः स्वस्य विशिष्टविधिगौरवपरिहारार्थं धात्वर्थभावनयोः प्राप्तिमन्यतोऽपेक्षते । तस्याश्चाऽपेक्षायां प्रत्यभिज्ञानमनुवादकारणम्, न त्वपेक्षाराहित्येऽपि । अतश्चाऽपेक्षाप्रत्यभिज्ञयोर्द्वयोरपि परस्परापेक्षत्वेनाऽनुवादकारणत्वात् यथैव 'सोमेने'त्यादौ सत्यामप्यपेक्षायां प्रत्यभिज्ञाभावान्न धात्वर्थभावनयोरनुवादः, तथैव प्रकृते विधेयान्तराभावेनाऽनुवादापेक्षाभावात् सत्यपि प्रत्यभिज्ञाने नाऽनुवादोपपत्तिः । अतश्च स्वोपमर्दापत्तेः विधिस्तावन्नैतादृशविषये सन्निधिकृतप्रत्यभिज्ञोपजीवी । नाऽपि यजिः, तस्याऽपि समानपदोपात्तविधिश्रुत्यनुरोधवृत्तित्वेन सन्निधिकृतप्रत्यभिज्ञानुपजीवकत्वात् । एवं सत्यपि यदि यजिस्तच्छब्दवत् प्रकृतमात्रवाची भवेत्ततस्तस्योपक्रमस्थत्वेन बलवत्त्वात् तदनुरोधेन जघन्यो विधिरेव 'देवांश्च याभिर्यजत' इतिवदनुवादकत्वेनैव नीयेत ।

वस्तुतस्तु तद्वदिह प्रयोजनाभावादानर्थक्यप्रतिहतत्वेन उपक्रमस्थयजेरेवाऽप्रकृतपरत्वं लक्षणयाऽभ्युपगम्यतैव, किमुत यदा यजिः प्रकृताप्रकृतसाधारणः, तदा समानपदोपात्तविधिपुनःश्रुत्यनुरोधेन सन्निधिकृतप्रत्यभिज्ञां बाधित्वा अप्रकृतविषयत्वे यजेर्न किञ्चिद्बाधकं पश्यामः । यत्तु प्रकृतेऽपि समिदादिदेवतानियमस्य (२)सत्त्वात् विधिर्धात्वर्थभावनांशे प्राप्तिसापेक्ष इत्युक्तम्, तन्न; अन्यतराकाङ्क्षाबललभ्यसम्बन्धानुमन्त्रणमन्त्रक-

---

१. इत्युत्सर्ग इति क. पु. २. विधेयस्य सत्त्वादिति क. पु.

ल्यवसन्तादिदेवतापेक्षया उभयाकाङ्क्षाबललभ्ययाज्यामन्त्रवर्ण-कल्प्यसमिदादिदेवतानां बलवत्त्वेन विषमशिष्टविकल्पानुपपत्तेः नियमविध्ययोगात् । अतः समिद्याग, स्वाहाकारयागे वाऽवान्तराधिकाराख्यप्रकरणेन सर्वेषां याज्यामन्त्राणामङ्गत्वावगतेः तद्बलेन मान्त्रवर्णिकसमिदादिमात्रदेवताकल्पनं नऽनुपपन्नम् ।

न चैवं 'वसन्तमृतूना' मित्याद्यनुमन्त्रणमन्त्राणां पूषानुमन्त्रणमन्त्रवदुत्कर्षापत्तिः, तद्देवतेषां प्रयाजानुमन्त्रणसमाख्यातत्वेन प्रयाजातिरिक्ते सामान्यसम्बन्धबोधकप्रमाणाभावादुत्कर्षानुपपत्तेः । अतो(१) मनोतामन्त्रवल्लक्षणयाऽत्र समिदादिदेवताप्रकाशनार्थान्येवैतानीति द्रष्टव्यम् , न तु तन्त्ररत्नोक्तप्रदृष्टार्थत्वम् ।

न चैवं(२) 'एको मम' इत्यादीनामनुमन्त्रणमन्त्रान्तराणां विकल्पापत्तिः, तेषामपि लक्षणया प्रयाजफलप्रकाशकत्वेन भिन्नकार्यतया समुच्चयोपपत्तेः । विशिष्य चाऽयमर्थः (३)पञ्चमे निरूपयिष्यते । अतस्समिदादिपदानां तत्प्रख्यन्यायेन नामधेयत्वाद्विधेयान्तराभावेन विधेर्धात्वर्थभावनाविषयत्वावगतेः विहितविधानायोगेन विधिपुनःश्रवणरूपादभ्यासाद्भेदसिद्धिः । अत्र च न पुनःश्रुतिमात्रस्य भेदसाधकत्वम्, तस्या अभेदसाधकत्वेन विरुद्धत्वात् । अतो विधिपर्यवसेशः । तस्य च स्वोपमर्दापत्तेरभेदसाधकत्वाभावान्न विरुद्धता । पुनःश्रवणं चऽनन्यपरं द्रष्टव्यम् । अतश्च 'दध्ना जुहोती'त्यादौ सत्यपि विधिपुनःश्रवणे गुणनिमित्तफलादिसम्बन्धपरत्वान्न भेदकता वि-

---

१. 'त्वं ह्यग्ने प्रथमो मनोतेति' मन्त्रः मनोतापदघटितत्वान्मनोतामन्त्र इत्युच्यते ।

२. 'एको मम एका तस्य योऽस्मान्द्वेष्टि यं च वयं द्विष्मः' इति पञ्च अनुमन्त्रणमन्त्राः प्रयाजप्रकरणे वाजसनेयिशाखायामाम्नाताः॥

३. पू. मी.५.१.३.

धिपुनःश्रवणस्य। अनन्यपरत्वेऽपि च विधानयोग्यपरत्वं द्रष्टव्यम्। अतश्च 'य एवं विद्वानि'त्यादौ सत्यप्यनन्यपरत्वे रूपाभावेन विधानयोग्यत्वाभावान्न भेदकतेति(१)उत्तराधिकरणे वक्ष्यते। प्रकृते तु जौहवाज्यस्य समिदादिदेवतायाः प्राप्तत्वेन रूपलाभान्न विधानायोग्यत्वम्।

वस्तुतस्तु 'य एवं विद्वानि'त्यत्राऽपि अधिकारवाक्यगतद्वित्वसिद्धिफलकसमुदायपरत्वेनाऽनन्यपरत्वाभावादेव न भेदकता। रूपाभावस्त्वतिशयार्थमुक्तः, अन्यथाऽव्यक्तत्वेन सौमिकधर्मातिदेशस्य विद्वद्वाक्ययोः,'वैश्वदेवेन यजेते'त्यादौ च कथमपि निवारयितुमशक्यत्वात्। न चैवमत्राऽपि विधिपुनःश्रवणस्य 'एकादश प्रयाजान् यजती'तिवदावृत्तिविधानार्थत्वेनाऽन्यपरत्वात् भेदकता न स्यादिति वाच्यम्। तत्र हि प्रयाजानुवादेन विधीयमाना सङ्ख्या निर्ज्ञातसंख्येषु तेषु साक्षात्सम्बन्धेन निवेशमलभमाना प्रयाजप्रयोगपरिच्छेदकत्वेन विधेयत्वायुक्तं यदर्थादभ्यासमापादयतीति,प्रकृते तु विधेयान्तराभावेन यागपुनःप्रयोगस्यैव विधेयत्वकल्पनात्'तनूपातं यजती'त्यादियजिना अदृष्टान्तरफलकस्य यागप्रयोगगतद्वितीयत्वादेः पुनःप्रयोगाभ्यासावृत्त्यपरनामधेयस्य लक्षणापत्तेः तत्परत्वायोगात्। 'तेन पुनर्यजेते'त्यत्र तु पुनश्शब्देनैव पौनःपुन्यस्य कृतत्वात् न लक्षणेति वैषम्यम्।

न चैवं सिद्धान्तेऽपि यजिधातुना यागत्वसामान्यवाचकेन विधेयतावच्छेदके विजातीययागत्वलक्षणा तुल्यैवेति वाच्यम्। तल्लक्षणायामपि तदवच्छेद्ययागव्यक्तेरशक्यतावच्छेदकीभूतयागत्वेनाऽप्यवच्छेदेनेदृशलक्षणाया अदोषत्वात्। अतः आवृत्तिरूपान्यपरत्वायोगात् अनन्यपरपुनःश्रवणस्य भेदकत्वमावश्यकमेव।

१. पू. मी. २. २. ३.

यत्तु भवदेवेनोपांशुयाजानुवादेन सामदादिदेवताविधानमिति पूर्वपक्षः कृतः, स वैकल्पिकसमिदादिदेवताकत्वे 'अतिहायेडो बर्हिः प्रतिसमानयत' इत्यादिसमुच्चयशास्त्रैकानुपपत्तेरेतद्विध्यन्यथानुपपत्तिकल्पितसमुच्चयविधिप्रसूतोपांशुयाजावृत्तिकल्पने च गौरवापत्तेः, 'विष्णुरुपांशु यष्टव्योऽजामित्वाये' त्याद्यर्थवादानुपपत्तेश्च निराकर्तव्यः। तस्मिद्धमनन्यपरविधिपुनःश्रवणरूपादभ्यासादेतेषु पञ्चस्वपि धात्वर्थभावनयोर्द्वयोरपि विधानावगतेः विहितविधानायोगेन भेद इति।

नन्वेवं संज्ञोपबन्धाख्यातेषु सर्वत्राऽभ्यासेनैव भेदसिद्धेर्न क्वचित्संज्ञाया भेदकत्वं भवेत्, तस्या वा भेदकत्वे प्रकृतेऽपि तत एव भेदसिद्धेर्नाऽभ्यासस्याऽसङ्कीर्णोदाहरणलाभ इति चेत्, न; यत्राऽऽख्यातसामानाधिकरण्याभावेन यागविशेषनामत्वानवगमेऽपि 'अथैष ज्योति'रित्यादौ अधिकारादथशब्दान्वयेनाऽनिर्धारितक्रियाविशेषसंज्ञात्वनिश्चयं कृत्वा तद्बलेनैव विध्याख्यातकल्पनम्, तत्राऽभ्यासस्य संज्ञाधीनसिद्धिकत्वेन दुर्बलत्वात् संज्ञयैव तदवधारणम्। यत्र वा 'उद्भिदा यजते'त्यादौ संज्ञाभावे प्रकृतस्यैव यागस्य फलसम्बन्धो गुणफलसम्बन्धो वा प्रकृतयागाश्रितो विधिपुनःश्रवणेऽपि विधीयत इत्यनन्यपरत्वाभावान्नाऽभ्यासस्य भेदकत्वम्, तत्राऽपि निष्प्रतिद्वन्द्वमेव संज्ञाया भेदकत्वम्। प्रकृते त्वभ्यासस्वरूपस्य संज्ञानधीनत्वादन्यपरत्वाभावेनाऽधिकबलत्वाच्च युक्तं तस्य भेदकत्वम्।

न च संज्ञाया अपि प्रकृते प्रत्याख्यन्यायसिद्धत्वेनाऽभ्यासस्य यागविध्यधीनत्वाभावात्, प्रत्युत संज्ञात्वाभावे देवताविधिपरत्वेनाऽभ्यासस्यैव तदधीनत्वात्, संज्ञयैव भेदसिद्धेर्नाभ्यासस्याऽसङ्कीर्णोदाहरणत्वमिति वाच्यम्। प्रकृतोदाहरणे प्रमाणद्वयसङ्करे-

ऽपि यत्रोभयत्र तुल्यवृत्तिकधातुपाराथ्यादिना नामधेयतासिद्धिः, तत्र विधेर्धात्वर्थभावनाविषयत्वद्वारकभेदावगमोत्तरमेव संज्ञात्वसिद्धेरभ्यासस्यैवाऽसङ्कीर्णस्य भेदबोधकत्वोपपत्तेः, प्रकृतोदाहरणेऽपि तत्प्रख्यन्यायस्य गुणविधिमात्रप्रतिबन्धकत्वात्, यजिसमभिव्याहारस्य च मन्त्रवर्णप्राप्तदेवतानुवादकत्वेनाऽप्युपपत्तेर्नामधेयकृत्यस्य चाऽवच्छेदस्य स्ववाक्योपात्तनामधेयेनैव सिद्धेर्नामत्वानवगमात् ततः पूर्वमेव विधिपुनःश्रवणस्य भेदकत्वोपपत्तेश्च । न चैवं तदुत्तरमपि नामत्वानवगमप्रसङ्गः, अभ्यासभिन्नकर्मान्तरस्यैवाऽवच्छेदकापेक्षायां तदङ्गीकारात् । अतश्च सिद्धोऽभ्यासमात्रप्रमाणकोऽत्र धात्वर्थभेद इति ।

भेदश्चाऽत्र न व्यक्तिमात्रस्य, अपि तु तद्गतजातेरपि, विधेयभेदे विधेयतावच्छेदकभेदस्यौत्सर्गिकत्वात् । अतश्च यागत्वादिव्याप्या जातयः समिद्यागत्वतनूपाद्यागत्वादिरूपास्तत्तद्व्यक्तिगतेन यजिना लक्षयित्वा तत्तदवच्छिन्नयागव्यक्तयो विधीयन्ते । न चाऽत्र विधेयतावच्छेदकमुपाधिरूपं किञ्चित्सम्भवति, तनूनपातादिदेवतानां यागविधेयतावगत्युत्तरकालं विधेयत्वेन विधेयत्वानवच्छेदकत्वात् ।

यत्तु वार्तिके गकारादिवदेकैव समिद्यागव्यक्तिर्नित्या तद्देशकालद्रव्यकर्त्रादिभेदेनाऽभिव्यज्यते, द्रुताद्युच्चारणभेदेनेव गकारव्यक्तिः । अतस्तद्भेदोपाधिकैव तस्या भेदप्रतीतिर्न तु स्वतः । सैव च विधिना विधीयते, विधेयतावच्छेदकाभावेऽपि च व्यक्तिमात्रं विधिना विधीयत इति पक्षान्तरमुक्तम्, तत् शब्दादपि निर्विकल्पकप्रत्ययोत्पत्तिमङ्गीकृत्येति द्रष्टव्यम् । यदा तु शब्दात्सविकल्पकमेवेति नियमः, तदा व्यवहारसौकर्यार्थं समिद्यागत्वादिजातिकल्पनेऽपि न किञ्चिद्बाधकम् । अत एव यत्रोपाधि-

रूपमेव पदप्रवृत्तिनिमित्तं सम्भवति, यथा—दर्शपूर्णमासेष्टिसत्रैकहायनीशब्देषु तत्तत्कालत्वादि, तत्र न जातिकल्पनम्, गौरवात्। प्रकृते तु तादृशोपाध्यभावाज्जातिकल्पनेऽपि न किञ्चिद्बाधकं पश्यामः। अस्तु वा समिद्यागत्वाद्यखण्डोपाधिः। तस्मात्सिद्धोऽभ्यासाद्भेदः।

प्रयोजनम्—देवताविधिपूर्वपक्षे तासां दृष्टार्थत्वेन विकल्पात्सकृदेव कर्मानुष्ठानम्। आवृत्तिविधिपूर्वपक्षे तु यत्र विकृतिविशेषेऽपूर्वार्थं समिद्यागपुनःश्रवणम्, तत्राऽपि तनूनपातादिसंज्ञिकायाआवृत्तेस्समिद्यागाङ्गत्वेन 'प्रधानं नीयमानं हि तत्राऽङ्गान्यपकर्षती'ति न्यायेन प्राप्तेः पञ्चकृत्वोऽनुष्ठानम्। तथा समिद्यागाश्रितस्य फलार्थस्य गुणस्य सायं प्रातरग्निहोत्रावृत्तौ दध्यावृत्तिवत्पञ्चवारमावृत्तिः। सिद्धान्ते तु प्रकृतौ प्रयाजानामदृष्टार्थत्वात्पञ्चानामप्यनुष्ठानम्। न च तत्राऽप्येकया प्रयाजसमाख्यया एककार्यत्वावगतेर्विकल्प एव युक्त इति वाच्यम्। 'त्रिरतः प्राचीनान्प्रयाजान्यजति' 'अतिहायेडो वर्हिः प्रतिसमानयत' इत्यादिसमुच्चयज्ञापकबलेन तत्सिद्धेर्विकल्पायोगात्। विकृतिविशेषे च पुनःश्रुतस्य समिद्यागमात्रस्यैवाऽनुष्ठानम्, काम्यश्च गुणस्तत्रैवाऽनुष्ठेय इति।

सूत्रं तु—एकस्य या अविशेषेण पुनःश्रुतिः साऽप्येवं कर्मभेदिका, अन्यथा आनर्थक्यापत्तेरिति व्याख्येयम् ॥ २ ॥

इति द्वितीयमभ्यासाधिकरणम् ॥ २ ॥

अथ तृतीयं पौर्णमास्यधिकरणम् ।

प्रकरणं तु पौर्णमास्यां रूपावचनात् ॥ २-२-३ ॥

(विषयसंशयौ)

इदानीमभ्यासस्याऽपवादः क्रियते । दर्शपूर्णमासयोः(१) 'य एवं विद्वान् पौर्णमासीं यजते' 'य एवं विद्वानमावास्यां यजत' इति वाक्यद्वयं श्रुतम् । तत्र किं कर्मान्तरं पौर्णमासीसंज्ञकममावास्यासंज्ञकं च विधीयते ? उत ये श्रुतपौर्णमासीकालसम्बन्धा आग्नेयोपांशुयाजाग्नीषोमीयाः प्रकृता यागास्ते पौर्णमासीवाक्येन, ये च श्रुतामावास्याकालसम्बन्धा आग्नेयसान्नाय्यैन्द्राग्नास्त अमावास्यावाक्येन समुदायसिध्यर्थमनूद्यन्त ? इति विचारः ।

(पूर्वपक्षः)

तत्र यजत इत्ययं तावद्विधिरित्यसन्दिग्धम् । सत्यपि च वर्तमानविभक्तित्वसन्देहे विध्यन्तरैकवाक्यत्वाभावेन स्तुत्यर्थमनुवादानुपपत्तेः, स्वतन्त्रानुवादस्य च वक्ष्यमाणरीत्या सार्थकत्वासम्भवेनाऽऽनर्थक्यापत्तेः परिशेषादेव पञ्चमलकारत्वनिश्चयात् । अत एव(२) 'यावदुक्थ्येनोपाप्नोति तावदुपाप्नोती'ति पौर्णमासीवाक्यस्य 'यावदतिरात्रेणोपाप्नोती' त्यमावास्यावाक्यस्याऽर्थवादोऽपि सङ्गच्छते । अन्यथा हि विधेयाभावात्कस्य स्तुतिरेताभ्यां क्रियेत ।

(३)न चैवं सति यच्छब्दैवंशब्दाभ्यां विधित्वप्रतिबन्धः, क्रियाविशेषितकर्तृसमानाधिकरणस्य यच्छब्दस्य, क्रियाविशेष-

---

१. २. तै. सं. १. ६. ९. ३ न चैवमपीति. क. पु.

परामर्शकस्यैवंशब्दस्य च समभिव्याहृतवेदनक्रियाविधिप्रतिबन्धकत्वेऽपि यागक्रियाविधि(१)प्रतिबन्धकत्वाभावस्य भवदेवैनैवोक्तत्वात् । अत एव(२) 'यो दीक्षितो यदग्नीषोमीयं पशुमालभत' इत्यत्र दीक्षाविधिः प्रतिबध्यते, न तु यागविधिः । अतश्च पूर्ववदेव विधिपुनःश्रवणात् कर्मान्तरत्वम् । न चाऽत्रान्यपरत्वम्, स्ववाक्ये फलनिमित्तगुणादिप्रतिपादकशब्दाभावेन तत्परत्वासम्भवात्, पौर्णमास्यमावास्याशब्दयोस्तव मम च नामधेयत्वात् ।

न च प्रापकप्रमाणात्पूर्वमेवैतद्वाक्यप्रवृत्त्यङ्गीकारेण तस्यैव कर्मणः प्रयोजनान्तरार्थं विधिरङ्गीक्रियत इति वाच्यम् । प्रापकप्रमाणस्याऽप्याग्नेयादिवाक्यरूपस्य श्रौतत्वेन ततः पूर्वं(३)एतत्प्रवृत्त्यङ्गीकारानुपपत्तेः, पुनर्विधानस्य च प्रयोजनाभावाच्च । तथा हि—न तावदेकेन पदेनाऽनेकेषामुपादाने साहित्यप्रतीतेस्समुदायासिद्धिः प्रयोजनम्, तस्यास्स्वतो निष्प्रयोजनत्वात् । न चैतद्वाक्याभावे 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेते' त्यधिकारवाक्ये दर्शपूर्णमासनामावच्छिन्नेन यजिनोपात्तानामेव यागानां फलसम्बन्धावगमेऽपि तेन द्विवचनान्तदर्शपूर्णमासपदावयवशक्तिपर्यालोचनया कालयोगिनां, द्वित्वयोगिनां चोपादानावगतेरुत्पत्तिवाक्ये कालयोगिनां चाऽऽग्नेयादीनां द्वित्वयोगाभावात्, द्वित्वयोगिनां चाज्यभागादीनां कालयोगाभावादप्रसिद्धार्थकदर्शपूर्णमासनामकत्वागतेः, तत्समभिव्याहृतेनाऽपि यजिना राजसूयवत्प्रकृतयागमात्रग्रहणेन सर्वेषां फलसम्बन्धापत्तेः, एतद्वाक्यद्वयसत्त्वे च कालयोगिनामाग्नेयादीनां समुदायद्वयकरणेन

१. प्रतिबन्धकताभावस्येति. के. पु. २. तै. सं. ६. १ .११
३. एतद्वाक्यप्रवृत्तीति. क. पु.

तद्द्वारकाद्वित्वसम्बन्धावगतेर्ज्योतिष्टोमवत्प्रसिद्धार्थकदर्शपूर्णमासनामावच्छिन्नेन यजिना तन्मात्रोपादानेन तेषामेव फलसम्बन्धावगतेष्वङ्गागफलसम्बन्धापादकनामगतद्विवचनप्रसिध्युपयोगिसमुदायद्वयफलकत्वेन वचनद्वयसार्थक्योपपत्तिरिति वाच्यम् । एतद्वाक्यद्वयेन पौर्णमास्यमावास्यासंज्ञकयागसमुदायद्वयकरणेऽप्यधिकारवाक्यस्थदर्शपूर्णमासशब्दस्य ततो भिन्नत्वेन तदुपस्थापकत्वानुपपत्तेरप्रसिद्धार्थकत्वस्य तदवस्थत्वात् । न हि पौर्णमासीपदं पूर्णमासपदं च तुल्यम्, दर्शामावास्यापदयोस्त्वैक्यमनाशङ्कनीयमेव । (१) यदा तु पूर्णमासशब्दस्याऽत्यन्तसाम्याभावेऽपि नामैकदेशत्वेन वाऽऽख्याविकारत्वेन वा पौर्णमासीपदोपस्थापनद्वारा तदर्थोपस्थापकत्वोपपत्तेः, दर्शशब्दस्य च विरुद्धलक्षणया चन्द्रादर्शनाधिकरणकामावास्यातिथिसम्बन्धिकर्मोपस्थापकत्वोपपत्तेः, अन्वारम्भणीयावाक्यशेषे च(२) "दर्शो वा एतयोः पूर्वः, पूर्णमास उत्तरोऽथ यत्पूर्णमासं पूर्वमारभते तदयथापूर्वं क्रियते, तस्मात्पूर्णमासं पूर्वमारभमाणस्सरस्वत्यै चरुं निर्वपेत्सरस्वते द्वादशकपालममावस्या वै सरस्वती पूर्णमासस्सरस्वाने" ति दर्शामावास्याशब्दयोः पर्यायत्वावगमात् प्रसिद्धार्थकत्वमाशङ्क्येत, तत(३) एतद्वाक्यद्वयफलभूतसमुदायानुवादद्वयाभावेऽपि अधिकारवाक्ये दर्शशब्देन पूर्णमासशब्देन च श्रुतकालयोगिनां त्रयाणामेव कर्मणामुपादानेन, तत्समानाधिकरणेन यजिना षण्णामेव फलसम्बन्धोपपत्तेर्वाक्यवैयर्थ्यात् ।

न च दर्शपूर्णमासप्रातिपदिकस्य कालयोगिषु प्रसिद्धार्थकत्वेऽपि द्विवचनस्याऽप्रसिद्धेः कथं तस्य यज्यवच्छेदकत्वमिति

---

१. अथ तु इति. क. पु. २. मै. सं. १. ४. १५.

३. एतद्वाक्यफलीभूतसमुदायद्वयाभावेऽपीति. क. पु.

वाच्यम् ? प्रातिपदिकप्रसिद्धिसत्त्वे(१)पाशाधिकरणन्यायेन द्विवचनानुरोधेन तत्त्यागानुपपत्तेः । (२)अवश्यं च समुदायद्वयसिद्धावपि फलवाक्ये भावार्थाधिकरणन्यायेन यजतेरेव करणसमर्पकत्वात्, तेन च षण्णामेकपदोपादानात् तन्त्राभिधानावगतैकसमुदायप्रतीतावपि यजिपदेन समुदायस्य शक्त्याऽनभिधानात्, तच्छक्यानां यागानामेव लक्षितसमुदायविशिष्टानां फलकरणत्वावगतेः,तेषां बहुत्वात् तत्सामानाधिकरण्यार्थं दर्शपूर्णमासपदेऽपि द्विवचनेन बहुत्वलक्षणा । अतश्च समुदायद्वयाभावेऽपि पापाशाधिकरणन्यायेन बहुत्व(३)लक्षणायामपि न दोषः । न चेयं निषिद्धा, 'सुपां सुपो भवन्ती' त्यभ्यनुज्ञानात् ।

न च लक्षणाविशेषेऽपि मन्मते द्वित्वस्य समुदायवृत्तित्वात् स्वाश्रयसमुदायघटकसमुदायिवृत्तित्वरूपस्य शक्यसम्बन्धस्य सत्त्वात्तदुपपत्तिः, तव तु तदभावे कथं लक्षणेति वाच्यम् ? ममाऽपि द्वित्वस्य पौर्णमास्यमावास्याकालवृत्तित्वात् स्वाश्रयकालीनयागवृत्तित्वरूपस्वशक्यसम्बन्धेन बहुत्वलक्षणोपपत्तेः । अतश्च विद्वद्वाक्याभावेऽपि षड्यागफलसम्बन्धापादकनामगतद्विवचनप्रसिध्युपपत्तेः समुदायकरणस्य वैयर्थ्यान्न तत्प्रयोजनतया समुदायिविधानोपपत्तिः । एतेन समुदायिनामनुवादः समुदायद्वयप्रयोजनक इति सिद्धान्त्यभिप्रेतं प्रत्युक्तम् । अत इचाऽनन्यपरविधिपुनःश्रवणरूपादभ्यासात् कर्मान्तरं विधीयते । पौर्णमास्यमावास्याशब्दश्च'पौर्णमास्यां पौर्णमास्या यजेत' 'अमा-

---

१. पू. मी. ९. ३. ५.

२. अतश्च तदनुरोधेन द्विवचन एव बहुत्वलक्षणाऽवगन्तव्येत्यधिकः पाठः 'क' पुस्तक उपलभ्यते ।

३. लक्षणा न दोषायेति क. पु.

वास्यायामावास्यया यजेते'ति वाक्यद्वयप्राप्तपौर्णमास्यमावास्याकालयोगेन तत्प्ररूयन्यायेन नामधेयम् । इदं हि वाक्यद्वयं तृतीयान्तनामधेयवशात् विद्वद्वाक्यविहितकर्मानुवादेन कालविधायकम्, अनन्यप्रयोजनत्वाच्च । न ह्याग्नेयादीनामुत्पत्तिवाक्यविहितकालकत्वेन प्रयाजाद्यङ्गानां च प्रधानकालकत्वेन तव मते एतस्य कालविधायकता सम्भवति ।

न चैवमपि कालविधौ सति नामधेयत्वम्, नामधेयत्वे च सति तदनुवादेन कालविधिरितीतरेतराश्रयापत्तिः, अग्निहोत्रन्यायेन पूर्वं सामानाधिकरण्येन(१) नामधेयत्वेऽवधारिते, पश्चात्तदनुवादविहितकालयोगेन प्रवृत्तिनिमित्तावधारणोपपत्तेः । अतस्तत्संज्ञककर्मान्तरविधानमेवेदम् । अत एव 'पौर्णमासी'मित्येकवचनं कर्मण एकत्वात्सङ्गच्छते । इतरथा समुदायिनां यागानां बहुत्वात् बहुत्वलक्षणार्थं स्यात् । द्वितीया तु 'अग्निहोत्रं जुहोती'तिवत् सामानाधिकरण्यार्थं करणत्वं लक्षयतीति न किञ्चिदनुपपन्नम् ।

न चैवमपि द्रव्यदेवतालक्षणरूपाभावाद्विधानायोग्यत्वम्, रूपाभावस्याऽसिद्धेः। तथा हि—द्रव्यं तावत् 'चतुर्ध्रुवायां गृह्णाती'ति प्रयोजनसाकाङ्क्षं ध्रौवं द्रव्याकाङ्क्षाभ्यामेव ताभ्यामुपांशुयाजवत् उभयाकाङ्क्षारूपाधिकराख्यप्रकरणेन सम्बध्यते ।(२) 'सर्वस्मै वा एतद्यज्ञाय गृह्यते यद्ध्रुवायामाज्य'मिति वचनेनाऽप्राप्तिबललब्धविधिशक्तित्वेन सर्वयज्ञार्थत्वेन तादर्थ्यचतुर्थ्या ध्रौवविधानाच्च । न चात्राऽऽज्यानुवादेन ध्रौवतामात्रस्य लाघवेन विधिप्रतीतेः न दृष्टान्ते दार्ष्टान्तिके वा सामान्यतोऽप्राप्ताज्यके तद्विधिसम्भव इति वाच्यम् । यज्ञाङ्गभूताज्यानुवादेन त-

१. नामत्व इति. क. पु. २. तै. ब्रा. ३. ३. ५.

द्विधौ विशिष्टोद्देशे वाक्यभेदापत्तेः, आज्यमात्रानुवादेन तद्विधौ चाऽलङ्करणादावपि तदापत्तेः यज्ञपदवैयर्थ्यप्रसङ्गात्, तदुद्देशेनाऽत्र ध्रौवाज्यस्यैव विधिप्रतीतेः बाधकाभावात्।

न चैवमुभयाकाङ्क्षाबलेनैव तत्प्राप्त्युपपत्तेः विधिवैयर्थ्यम्, तद्बलेनाऽलङ्करणादिष्वयज्ञेष्वपि तत्प्राप्तिसम्भवेन तस्य तदृथावृत्तिफलकत्वात्। अत एवाऽलङ्करणादौ जौहवादिग्रहणेन निराकाङ्क्षस्याऽप्याज्यस्थाल्याज्यस्यैव विनियोगः, न तु ध्रौवस्य। तस्माद्दृढ्यं तावन्निर्बाधम्।

देवताऽप्याज्यभागक्रमाम्नातानामपि वार्त्रघ्नीवृधन्वतीमन्त्राणां(१)'वार्त्रघ्नी पौर्णमास्यामनूच्येते वृधन्वत्यमावास्याया'मिति वचनेन क्रमं बाधित्वा विद्वद्वाक्यविहितकर्माङ्गत्वेन विनियुक्तत्वात्, तदन्यथानुपपत्तिकल्प्या अग्नीषोमरूपाऽत्र मान्त्रवर्णिकी। न चाऽबाधेनोपपत्तौ बाधायोगादाज्यभागयोरेवाऽव्यवस्थया प्राप्तानां मन्त्राणां व्यवस्थामात्रकरणेन वचनोपपत्तेः मान्त्रवर्णिकदेवताकल्पने प्रमाणाभाव इति वाच्यम्। आज्यभागयोः पौर्णमास्यमावास्याकालकर्तव्यत्वस्य विध्यभावेनाऽप्राप्तत्वात् तिथ्यन्तरक्रियमाणविकृतिषु वार्त्रघ्न्यादिप्राप्त्यभावापत्तेश्च। पौर्णमास्यां यावाज्यभागौ तत्र वार्त्रघ्नी इति कालकृतव्यवस्थानुपपत्तेरेतद्वाक्यस्थपौर्णमास्यमावास्यापदाभ्यां प्रसिद्धनामधेयत्वेन विद्वद्वाक्यस्थकर्मणोरेव लक्षणयोपस्थापनावगमादाज्यभागयोश्चैतत्पूर्वपक्षे समप्राधान्यस्य वक्ष्यमाणत्वेन विद्वद्वाक्यविहितकर्माङ्गत्वात् पौर्णमास्यमावास्यापदाभ्यां तत्तद्वाक्यविहितकर्माङ्गभूताज्यभागलक्षणायां गौरवापत्तेश्च। एतद्वाक्यविहितपौर्णमास्याख्यकर्माङ्गभूताज्यभागयोर्वार्त्रघ्नी इति कर्मकृतव्यवस्थाया

१. तै. सं. २. ५. २.

अप्यनुपपत्तेर्लाघवेन एतद्वाक्यविहितकर्माङ्गत्वेनैव मन्त्रविध्यवगमात् मान्त्रवर्णिकदेवताविधानोपपत्तेः । एवं सत्यप्येतयोर्यद्यग्नीषोमीयादिवदन्यदेवताकत्वमवगतं स्यात्, ततो वाक्येन लिङाद्यायोगादगत्या विशिष्टलक्षणामङ्गीकृत्य गौरवमपि(१)'मिथश्चाऽनर्थसम्बन्ध'इति तृतीयस्थाधिकरणन्यायेनाऽऽश्रियेत, न तु तदस्ति । अत एवोपक्रमस्थपौर्णमास्यमावास्यापातिपदिकगतविशिष्टलक्षणागौरवभिया उपसंहारस्था सप्तम्येव 'तत्र जयाञ्जुहुया' दितिवल्लक्षणया प्राधान्यं प्रतिपादयन्ती न दुष्यति । अतोऽग्नीषोमप्रकाशकयोर्वार्त्रघ्नयोर्ऋचोः पौर्णमासीकर्माङ्गत्वात्ताद्दश्योरेव च वृधन्वत्योरमावास्याकर्माङ्गत्वादेकैकस्मिन् कर्मणि मन्त्रद्वयस्य दृष्टार्थत्वेन विकल्पावगतेः देवताद्वयस्याऽपि विकल्पः। एतयोश्चाऽनुवाक्यासमाख्यातत्वेऽपि न देवतालक्षणा, 'याज्यानुवाक्या' इति स्मरणात् तत्तद्दैवत्ययाज्यान्तरकल्पनं द्रष्टव्यम् ।

वस्तुतस्तु वार्त्रघ्नीत्याद्येकपदोपादानसामर्थ्यात् द्वयोरपि मन्त्रयोः साहित्यप्रतीतेः न विकल्पः । अतश्च मान्त्रवर्णिकदेवताद्वयस्याऽपि समुच्चयादेकैकस्य कर्मणोऽग्निहोत्रादिवदावृत्तिः, समुच्चितयाज्याद्वयकल्पनञ्च । अस्तु वा मन्त्रद्वयेनाऽपि लाघवाद्व्यासज्यवृत्त्येकदेवतात्वकल्पनम्, उभयप्रकाशकैकयाज्याकल्पनं च । सर्वथाऽस्ति विद्वद्वाक्यविहिते कर्मणि देवता ।

यत्तु वार्तिके अनयोरेवैका अनुवाक्या, एका याज्या, उभयत्राऽपि मनोतान्यायेनोभयत्र लक्षकत्वमङ्गीकृत्य कल्पनीयेत्युक्तम्, तत् अनुवाक्यासमाख्याबाधापत्तेर्लक्षणायां प्रमाणाभावाच्चोपेक्षितम् । आज्यभागयोस्तु 'तौ होचतुरग्नीषोमौ किमावयोर्वस्तु तत्स्या' दिति प्रकृतयोरग्नीषोमयोः 'यस्यैककस्यै देवतायै ह-

१. जै. सू. ३. १. २३.

त्रिर्निर्वपन्नाज्यस्यैव नौ यज' इत्यत्र पुराकल्पसरूपार्थवाद-कल्प्ये विधौ 'नौ' इत्यनेन द्वितीयान्तेन देवतास्वस्य 'विष्णुं यजती' तिवदुक्तत्वात्, 'अग्नीषोमाभ्यामाज्यभागौ यजती'ति-वचनेनैव वा तद्विधानात् तदनुरूपानुवाक्याकल्पनम् । याज्या तु क्रमप्राप्ता अव्याहतैव । अतश्च विद्वद्वाक्यविहिते कर्मणि क-र्मरूपसत्त्वान्न विधानायोग्यत्वम् ।

अथ वाऽस्तु(१) एतद्वाक्यविहितकर्मानुवादेन समिदादि-वाक्ये देवताविधिः, समुच्चयज्ञापकसत्वाच्च(२) समुच्चयः। न चोपांशुयाजे समिदादिदेवताविधौ 'विष्णुरुपांशु यष्टव्य' इत्या-द्यर्थवादानुपपत्तिवदिह काचिदनुपपत्तिरस्ति । अस्तु वा (३)अ-व्यक्तत्वसादृश्यात् सौमिकधर्मातिदेशः । न च वाचनिकपौर्ण-मास्यमावास्या(४)कालसम्बन्धबाधप्रसङ्गात् पार्थसारथ्युक्तानति-देशः, वाचनिककालानुरोधेन सुत्यान्यकालीनाङ्गबाधेऽपि त-त्कालीनाङ्गानामतिदेशोपपत्तेः । प्रयाजानां तु मान्त्रवर्णिकदेवता-कत्वेन व्यक्तत्वात् कृत्स्नविधानाच्च(५) न सौमिकधर्मातिदेश प्रसक्तिरिति न तत्प्रतिबन्ध्यापादनं(६) शक्यम् । तस्माद्रूपोपपत्तेः (७)कर्मान्तरविधौ एताविति सिद्धम् ।

एवञ्च फलवाक्येन षण्णामेव फलसम्बन्धसिध्यति । तथा हि—सर्वत्र प्रसिद्धपदसमभिव्याहारेणाऽप्रसिद्धपदार्थनिर्णयः । तद्यत्र नामधेयं प्रसिद्धम्, यथा चतुर्थान्त्यन्यायेन ज्योतिष्टोमप-दं सोमयागे, तत्र प्रकृतमात्रग्राहियाजिनिर्णयः । यत्र वा याजि-

---

१. एतत्कर्मानुवादेनेति क. पु. २. तासां समुच्चय इति क. पु.
३. अव्यक्तत्वादिति क. पु. ४ कालबाधप्रसङ्गादिति क. पु.
५. सौमिकधर्मातिदेशप्रसङ्गानुपपत्तेरिति क. पु.
६. अनाशङ्क्यमेवेति क. पु. ७. कर्मान्तरविधिरेवेति क. पु.

पदं यागमात्रे प्रसिद्धम्, नामधेयं तु राजसूयादिरूपं प्रकृतयागायागमात्रपरं सम्भाव्यते, तत्र यजिनैव चतुर्थपादाद्यन्यायेन नामधेयनिर्णयः। न च राजा सोमस्सूयते अभिषूयतेऽस्मिन्निति व्युत्पत्त्या राजसूयपदस्याऽपि सोमयागमात्रे ज्योतिष्टोमपदवत्प्रसिद्धार्थकत्वात् तेनैव यजिनिर्णयोपपत्तेः कथं यजिना नामधेयनिर्णयः? राज्ञा क्षत्रियेण सूयते निष्पाद्यते असाविति व्युत्पत्त्या, राजा क्षत्रियः सुनोति स्नाति अभिषेकेणाऽऽर्द्रीक्रियतेऽस्मिन्निति व्युत्पत्त्या वा सर्वेष्वपीष्टिपशुसोमयागेषु राजसूयपदप्रवृत्तिसम्भवेन तस्य प्रसिद्धार्थकत्वाभावात् यजिना तन्निर्णयोपपत्तेः। तदिह दर्शपूर्णमासाभ्यामिति द्विवचनान्तं नामधेयमपि न प्रसिद्धार्थम्। द्वित्वस्याऽऽज्यभागादौ प्रसिद्धत्वेऽपि प्रातिपदिकस्य काऽप्यप्रसिद्धत्वात्।

न च तस्याऽपि पौर्णमास्यमावास्याकालरूपस्वशक्यसम्बन्धेनाऽस्त्याग्नेयादौ प्रसिद्धिः, दर्शपूर्णमासपदस्य पौर्णमास्यमावास्यापदाद्भिन्नत्वेन तदर्थ(१)वाचकत्वे प्रमाणाभावात्। अत एव पौर्णमास्यमावास्यानामकयोरपि विद्वद्वाक्यद्वयविहितकर्मणोर्दर्शपूर्णमासपदेना ग्रहणम्। न चैवमपि द्वित्वमात्रस्यैव प्रसिद्धेः तदनुरोधेन यजिना आज्यभागयोरेवोपादानोपपत्तेस्तयोरेव फलसम्बन्धापत्तिः, आग्नेयवाक्ये यागद्वयविधानस्याऽनुपदमेव वक्ष्यमाणत्वात् तावादाय विनिगमनाविरहात्। अतो द्विवचनप्रतिरूपकमव्ययमिदं यजिसामानाधिकरण्यात् प्रकृतयागवाचकत्वेन निर्णीयते इति राजसूयन्यायेन सर्वेषां फलसम्बन्धान्न षड्यागमात्रवृत्ति फलम्।

अस्तु वा पूर्वोक्तनामैकदेशत्वादियुक्तिनिचयबलेन दर्शपूर्णमास-

१. वाचित्व इति क. पु.

शब्दस्य शक्त्या पौर्णमास्यमावास्याकालवाचित्वं निरूढलक्षणया च तद्योगिकर्मपरत्वम्, तथाऽपि आग्नेयादीनां षण्णां विद्वद्वाक्यविहितयोश्च कर्मणोः कालयोगस्याऽविशेषादर्शपूर्णमासपदेन ग्रहणोपपत्तेः, द्विवचनस्य च(१) पाशाधिकरणन्यायेन बहुत्वलक्षणार्थत्वेऽपि बाधकाभावादृष्टानामेव फलसम्बन्धोपपत्तेः न षण्णामेव सः। अथ वा विद्वद्वाक्यविहितकर्मणोः पौर्णमास्यमावास्यासंज्ञकत्वप्रसिध्या तत्पर्यायदर्शपूर्णमाससंज्ञकत्वस्याऽपि प्रसिद्धेः, सिद्धान्तवत्पूर्वपक्षेऽपि प्रचयशिष्टद्वित्वप्रसिध्युपपत्तेः, तयोरेव फलसम्बन्धान्न षण्णामेव सः। अपि चाऽऽग्नेयद्वये पौर्णमास्यमावास्याकालत्वेन प्रातिपदिकप्रसिद्धेरेकवाक्योपादानावगतद्वित्वप्रसिध्या च द्विवचनप्रसिध्युपपत्तेस्तस्यैव फलसम्बन्धान्न षण्णामेव सः। तस्माद्यस्य कस्यचित्फलसम्बन्धेऽपि विद्वद्वाक्ययोः कर्मान्तरविधित्वमव्याहतमिति प्राप्ते-

(सिद्धान्तः)

अभिधीयते— नाऽत्राऽभ्यासस्वरूपमस्ति, 'यजत' इत्यस्य वर्तमानापदेशत्वेन विधित्वाभावात्। न चाऽप्राप्तार्थकत्वेन लेट्त्वनिश्चयः, आग्नेयादियागानां प्राप्तानामेवाऽनुवादसम्भवेन तदसिद्धेः। प्रत्युत यच्छब्दैवंशब्दसमभिव्याहारेणाऽनुवादत्वोपोद्बलनाच्च। न च तयोर्वेदनमात्रविधिप्रतिबन्धकत्वेऽपि न यागविधिप्रतिबन्धकत्वम्, तस्य तच्छब्दसमभिव्याहारावधिकसमभिव्याहृतमात्रवृत्तिविधिप्रतिबन्धकत्वस्य(२) 'देवांश्च याभिर्यजत' इत्यत्र साधितत्वात्। एवं सत्यपि यच्छब्दस्य प्राप्तिद्योतनमात्रकारित्वात् यदि प्रमाणान्तरेण विशेषणस्य विशेष्यस्य विशिष्टस्य वा प्राप्तिर्न भवेत्, ततोऽगत्या विधिरप्यङ्गीक्रियेत। अत एव

१. पू. मी. २. ३. ४. २. पू. मी. २. ८ ११.

'यो दीक्षितो यदग्नीषोमीय'मित्यत्र यच्छब्दो दीक्षामात्ररूपविशेषणप्राप्तिद्योतक एव, यागस्त्वप्राप्तत्वाद्विधेय एवेति विशेषः । अतश्च यच्छब्दोपबन्धादपि न लेटूत्वनिश्चयः ।

न चाऽऽनर्थक्यप्रसङ्गात्तन्निश्चयः, तदसिद्धेः । तथा हि—यजत इत्यनेन तावदेकैकेन प्रकृतत्वाविशेषेऽपि तत्तन्नामधेयसामानाधिकरण्यात् श्रुततत्कालयोगिन एव त्रयो यागा अनूद्यन्ते । तेषां च पौर्णमास्यमावास्यापदं तत्प्रख्यन्यायेन नामधेयम् । ततश्च त्रयाणामेकशब्दोपादानादेकप्रतीतिविषयत्वाच्च समुदायप्रतीतिः । अत एव 'पौर्णमासी' मित्याद्येकवचनं स्वाश्रयघटकवृत्तित्वसम्बन्धेन बहुत्वलक्षणार्थम् । द्वितीया तु यागानां(१)अर्थाक्षिप्तकर्मानुवादिनी मन्यते यथाश्रुतैव । अत्र समुदायस्य चाऽनुवदितारौ समुदायवचनावेताविति यथाश्रुतभाष्याद्यनुसारान्न पौर्णमास्यमावास्यादिशब्दा आग्नेयादिसमुदायवचना इति न भ्रमितव्यम् , तयोः कालयोगाभावेन तत्प्रख्यन्यायाविषयत्वात् मानान्तरापरिमितत्वेनाऽनुवादायोगाच्च, यजिना तदनुवादे लक्षणापत्तेश्च । अतश्च समुदायिनामेव समुदायसिध्यर्थमनुवाद इति द्रष्टव्यम् ।

तत्प्रयोजनं च फलवाक्ये निमित्तवाक्ये चाऽनूद्यमानानामेव फलादिसम्बन्धसिद्धिः । तथा हि—दर्शपूर्णमासशब्दस्य पौर्णमास्यमावास्याशब्दपर्यायत्वस्य स्थापितत्वात् तत्संज्ञकानामाग्नेयादीनां षण्णामेव फलादिसम्बन्धित्वेन यजिनोपादानं सिद्धं भवति । तत्रत्यद्विवचनस्य च बहुत्वलक्षणायां स्वाश्रयघटकवृत्तित्वरूपशक्यसम्बन्धोऽपि प्रमापिता भवति ।

न चैतद्वाक्याभावेऽपि दर्शपूर्णमासप्रातिपदिकस्य श्रुतका

१. अथाक्षिप्तकर्मत्वेनैवाऽनुवादादिति क. पु.

लयोगिष्वाग्नेयादिष्वेव प्रवृत्त्युपपत्तेः, द्विवचनस्य च स्वाश्रयकालीनयागवृत्तित्वसम्बन्धेन बहुत्वलक्षणोपपत्तेः षण्णामेव फलादिसम्बन्धः (१)सिध्यतीति वाच्यम् । एतद्वाक्याभावे साक्षात्सम्बन्धेन कालद्वित्वोभययोगिनोराग्नेययोरेव तत्सम्बन्धापत्तौ बहुत्वलक्षणायां प्रमाणाभावेन षण्णां फलादिसम्बन्धासिद्धेः । अतस्तत्सिध्यर्थोऽयं समुदायानुवादः । सति ह्यस्मिन्ननुवाद आनर्थक्यभिया तत्प्रयोजनजिज्ञासायां फलवाक्यस्थद्विवचनस्य उक्तसम्बन्धेन बहुत्वलक्षणातात्पर्यग्राहकत्वावसायात् षण्णां फलसम्बन्धसिद्धिः सुलभैव ।

ननु नाऽऽग्नेयभेदे प्रमाणमस्ति । न तावदेकस्मिन् कर्मण्यिसम्भवन्निवेशः समुच्चितकालद्वयलक्षणो गुणः, तस्याऽऽवृत्त्यापि निवेशोपपत्तेः । अन्यथा सायम्प्रातःकालभेदेनाऽग्निहोत्रस्याऽपि भेदापत्तेः । न च कालस्याऽनुपादेयत्वेनोद्देश्यत्वात् तदनेकत्वनिमित्तवाक्यभेदापत्त्या गुणविधयैव भेदकत्वोपपत्तिः, कालस्योद्देश्यत्वेऽप्यङ्गत्वापरपर्यायस्याऽज्ञातज्ञापनाविषयत्वापरपर्यायस्य च विधेयत्वस्य सत्त्वेन 'अमावास्यायामपराह्णे पिण्डपितृयज्ञेन' इतिवद्वाक्यभेदानापादकत्वात् । विधेयानेकत्वकृतं तु सत्यपि प्राप्तकर्मानुवादे 'अर्धमन्तर्वेदि मिनोती'तिवत् पौर्णमास्यमावास्यापदाभ्यां पर्वलक्षणयोभयविधानोपपत्तौ यत्र परिहर्तुं शक्यः, तत्राऽपूर्वकर्मविधौ पिण्डपितृयज्ञवाक्य इव कालद्वयविशिष्टकर्मविधानोपपत्तेः कथं न शक्यते परिहर्तुम् ।

नाऽप्यनुपादेयगुणयोगरूपं प्रकरणान्तरं तद्भेदकम् तस्य 'सन्निधौ त्वविभागा'दिति न्यायेन सन्निधावप्रवृत्तेः । किञ्च संख्याव्यतिरिक्तभेदकप्रमाणानां वाक्यान्तरविहितकर्म-

१, सिध्यत्येवेताति. क पु.

प्रतियोगिकभेदकत्वनैयत्यस्य पार्थसारथिनोक्तत्वान्न स्ववाक्य-विहितकर्मप्रतियोगिकभेदबोधकत्वं तयोः सम्भवति । अतश्च (१)आग्नेयैक्यस्यैव पार्थसारथ्युक्तस्य युक्तत्वात् कथं तावादाय फलसम्बन्धापत्तिरिति चेत्,

न; आग्नेयद्वित्वे गुणस्यैव भेदकत्वात्। तथा हि—यो हि पदार्थो भेदमावृत्तिं वा विना न कर्मान्वययोग्यः, स उत्पत्तिवाक्यस्थस्सन् कर्मभेदं बोधयति, उत्पन्नवाक्यस्थस्तु(२) पदार्थः तदावृत्तिम् । (३)दृष्टश्चैतत् सङ्ख्यायाम् । अतश्च समुच्चितकालद्वयरूपगुणो-ऽपि भेदमावृत्तिं वा विना कर्मान्वयमप्रमातिपद्यमान उत्पत्तिवा-क्यस्थत्वादिह कर्मभेदं बोधयति, उत्पन्नवाक्यस्थस्तु सायं प्रातः कालरूपमावृत्तिम् । अत एकस्मिन् कर्मण्यसम्भवन्निवेशो गुण एव समुच्चितकालद्वयरूपो भेदकः । यथा चैवं सति सङ्ख्याया न गुणान्तर्भावस्तथा(४) सङ्ख्याधिकरणे वक्ष्यते । प्रमाणबलेन च गुणस्य स्ववाक्यविहितकर्मप्रतियोगिकभेदबोधकत्वेऽपि न दोषः । अत एव पार्थसारथ्युक्तमुत्पत्तिशिष्टगुणावरोधे वाक्य-भेदापत्तौ च गुणात् भेद इति द्वैविध्यं प्रमाणाभावेनैवाऽपास्तम्, 'वषट्कर्तुः प्रथमभक्ष' इत्यत्रैकप्रसरताभङ्गप्रसङ्गेन तस्य भेदक-त्वाङ्गीकारात् ।

न च वषट्कर्तृ(५)भक्षोद्देशेन प्राथम्यविधौ(६) विशिष्टोद्दे-शापत्तेः वाक्यभेदाभियैव गुणस्तद्भेदक इति वाच्यम् । वषट्क-र्तृत्वे निमित्ते भक्षानुवादेन प्राथम्यविधावपि विजातीयोद्देशे तद-

---

१. आग्नेयैकत्वस्यैवेति. क. पु.
२. पदार्थ इति नास्ति क. पु. ३. व्यक्तश्चेति. क. पु.
४. पू. मी. २. २. ७ ५. भक्षानुवादेनेति क. पु.
६. विशिष्टोद्देशे वास्यभेदापत्तेस्तद्भियैवेति क. पु.

भावादेकप्रसरताभङ्गभयेनैव तस्य भेदकत्वात् । अतो यथाकथञ्चिदेककर्मण्यनिविशमानस्यैव गुणस्य भेदकत्वात् सिद्धोऽत्राऽपि गुणाद्भेदः । भेदोऽपि चाऽत्र सङ्ख्यावदनेकत्वबोधनद्वारैव बोध्यते, न तु किञ्चित् प्रतियोगिकः, प्रमाणान्तरवत् प्रतियोगिनः पूर्वमप्रसिद्ध्या तन्निरूपितभेदस्य बोधयितुमशक्यत्वात् । तस्मादाग्नेयभेदः ।

केचित्त्वत्र (१)प्रकरणान्तरन्यायेन भेदं समर्थयन्ते । तथा हि—यद्यनिविशमानत्वेनाऽनुपादेयस्थलेऽपि गुणस्यैव भेदकता, ततो 'मासमग्निहोत्रमि'त्यत्रापि तस्यैव भेदकत्वोपपत्तेः कृतं प्रकरणान्तरेण । अतोऽनुपादेयत्वावच्छिन्नं प्रति तावत् प्रकरणान्तरस्यैव भेदकतेति स्वीकर्तव्यम् । न चैवमप्यसन्निध्यभावात् कथं तस्य भेदकता ? भेदबोधकतादशायां तत्प्रतियोगिककर्मोपस्थित्यभावरूपस्याऽसन्निधेर्मासाग्निहोत्रवदिहापि तुल्यत्वादित्याहुः—तन्न, मासाख्यगुणस्याऽपूर्व(२)कर्मण्यसन्निविशमानत्वेऽप्यसन्निध्युपष्टम्भकत्वेन स्वतो भेदकत्वात् गुणवैलक्षण्येन प्रकरणान्तरत्वोपपत्तेः । अत एव सन्निधौ सायं जुहोतीत्यत्र न तस्य भेदकत्वम् ।

किञ्चाऽसन्निधिः किमुपस्थित्यभावः ? उपस्थापकप्रमाणाभावो वा ? नाऽऽद्यः, अत्यन्तविस्मरणशीलस्य 'सायं जुहोती'त्यादावपि उपस्थित्यभावे भेदप्रसक्तेः । 'मासमग्निहोत्रं जुहोती'त्यादावपि अत्यन्तमेधाविनः तत्सत्त्वे भेदप्रमानुपपत्तेश्च । अन्त्येऽपि ज्ञातस्य वा भेदबोधकता ? उताऽज्ञातस्य वा ? अन्त्ये उपस्थापकस्य प्रमाणस्य प्रकरणादेः भ्रमात्मकोपस्थितावपि 'मासमग्निहोत्रं जुहोती'त्यादौ वस्तुतः प्रमाणाभावस्य सत्त्वा-

१. पू मी. २. ३. ११ २. कर्मण्यनिविशमानत्वेऽपीति क. पु.

म् भेदप्रमाबोधापत्तेः। आद्ये तु आग्नेयवाक्ये भेदप्रतियोगिनोऽप्रसिद्धेः तदुपस्थापकप्रमाणाभावज्ञानस्याऽशक्यत्वात् भेदबोधासम्भवः। मासाग्निहोत्रादौ तु नित्याग्निहोत्रविधिनोपस्थितस्य प्रतियोगिन इहोपस्थापकप्रमाणाभावस्य ज्ञातुं शक्यत्वादसन्निध्यविघातः। तस्मात् गुणादेवाग्नेयभेदः। विस्तरेण चैतत् प्रकरणान्तरन्यायशरीरोपपादनप्रस्तावे उपपादयिष्यते।

अतश्चाग्नेयभेदात् समुदायानुवादाभावे तयोरेव फलसम्बन्धापत्तेः तद्व्यावृत्तिफलकतया षण्णां फलसम्बन्धसिद्धिरेव समुदायानुवादप्रयोजनमिति सिद्धम्। (१)विशेषाच्चेदं (२)चतुर्थे उपपादयिष्यते। अतश्चानर्थक्याभावादपि न तद्धयेन विधित्वनिश्चयः। अर्थवादस्त्वेतद्वाक्यफलीभूतसमुदायस्तावक एव सन् प्रयोगविधिबोध्यप्रवृत्तिप्रतिबन्धकीभूतालस्यनिवृत्तावेव परम्परासम्बन्धेनोपयुज्यत इति न सोऽपि विधित्वनिश्चायकः। अस्तु वा विधिनत्वनिश्चयः, तथाऽपि फलसम्बन्धसिध्युपयोगिसमुदायफलकत्वेन तस्याऽन्यपरत्वान्नाऽभ्यासस्वरूपसद्भावः सम्भवतीति न कर्मान्तरम्। अत एवैतद्वाक्यविहितकर्मानुवादेन समिदादिदेवताविधिः, ज्योतिष्टोमधर्मातिदेशः, अन्यदपि वा देवतापापकं नैवोपन्यसनीयम्। ज्यौतिष्टोमिकधर्मातिदेशस्तु सोमविधेर्दक्षिणीयाद्यङ्गद्वारेण दर्शपूर्णमासविध्युपजीवित्वात् तयोरपि तदुपजीवित्वेइतरेतराश्रयापत्तिरिति भवदेवोक्तप्रकारेणाऽपि निराकर्त्तव्यः। वार्त्रघ्नीवृधन्वत्योस्तु लिङ्गक्रमाभ्यामाज्यभागात्ववगतेः न विद्वद्वाक्यविहितकर्मणि देवताविधायकत्वम्। न च ब्राह्मणवाक्येन तयोर्बाधः, अबाधेनाऽप्युपपत्तौ बाधायोगात्।

किञ्च ब्राह्मणवाक्यमपि स्वरसेनाऽऽज्यभागपरतामेव मन्त्र-

---

१ विशेषतश्चेति. क पु. २. पू. मी. ४. ४. ११

स्याऽवगमयति । अन्यथा पौर्णमास्यमावास्याप्रातिपदिकयोः कर्मपरत्वे लक्षणापत्तेः, सप्तम्याः प्राधान्यलक्षणकत्वापत्तेश्च । अपूर्वविधित्वाङ्गीकारे अश्रुतदेवताविधिकल्पने अश्रुतयाज्यान्तरकल्पने आज्यभागयोश्चाऽश्रुतानुवाक्याकल्पने गौरवापत्तेश्च । अतो मन्त्रचतुष्टयस्याऽप्याज्यभागाङ्गतया अनियमेन प्राप्तस्य नियममात्रं विधिवाक्येन क्रियते, लाघवात् । पौर्णमास्यमावास्याप्रातिपादकाभ्यां शक्त्या काल एव प्रतिपाद्यते, सप्तम्या चाऽधिकरणत्वं वा । अतश्चाज्यभागाङ्गतया प्राप्तयोर्वार्त्रघ्न्योः पौर्णमासीनिमित्तकत्वं, तादृश्योश्च दृषद्वत्योरमावास्यानिमित्तकत्वमिति सम्भवति, पौर्णमास्यमावास्ययोस्तन्निमित्तकता, आज्यभागयोः तत्कालीनप्रधानाङ्गत्वेन तत्कालकत्वात् । निमित्तसम्बन्धप्रयोजनं च व्यवस्थासिद्धिरिति नियमफलकत्वं लाघवं च ।

वस्तुतस्तु न कालस्य निमित्तता, आज्यभागयोः प्रतिपदि क्रियमाणत्वेन तत्कालीनत्वाभावात् । न च खण्डपर्वाणि कदाचित् तत्कालकत्वसम्भवात् निमित्तत्वोपपत्तिः; तथात्वे सम्पूर्णपर्वाणि तत्कालिकत्वासम्भवेन मन्त्रनिवृत्तिरूपशेषपरिसंख्याफलकत्वापत्तेः । अतः शेषनियमरूपलाघवानुरोधेन पौर्णमास्यमावास्यापदं तत्कालीनप्रधानाङ्गभूताज्यभागलक्षकम् । प्रधाने तत्कालीनता च प्रयोगारम्भद्वारिकैव, न तु साक्षात्, प्रधानस्य तस्मिन् काले नियमेनाऽकरणात् । अत एव प्रकृतौ सर्वत्र पौर्णमास्यादिकालविधिः वचनान्तरानुसारादारम्भद्वारक एव । सप्तमी च प्राधान्यपरा । तेन तादृशाज्यभागयोर्मन्त्रविशेषविधानात् प्रकृतौ सर्वदैव व्यवस्थासिद्धिः । विकृतौ च पौर्णमासीविकारस्याऽमावास्याविकारस्य वा यस्मिन् कस्मिंश्चित् दिने करणेऽपि वार्त्रघ्नीदृषद्वत्योर्व्यवस्थासिद्धिः । अतो 'वार्त्रघ्नी पौर्णमास्यामि'

त्येतद्वाक्यद्वयमेव स्वगौरवपरिहारार्थमाज्यभागाङ्गत्वं मन्त्रस्याऽप्यनुजानातीति न तद्बलेन विद्वद्वाक्यविहिते कर्माणि देवताविधिः सम्भवतीति देवताभावादपि समुदायानुवादत्वम्। न चैवं सर्वस्य वाक्यस्याऽनुवादकत्वे अनधिगतार्थगन्तृत्वरूपप्रामाण्यानापत्तिः, शक्यार्थानुवादकत्वेऽप्यनधिगतसमुदायादिबोधकत्वेन प्रामाण्योपपत्तेः(१)मन्त्राधिकरण एवोक्तत्वात्।

नन्वेवं विद्वद्वाक्ययोरर्थवत्त्वेन प्रामाण्येऽपि 'पौर्णमास्यां पौर्णमास्या यजेते'त्यादिवाक्ययोरानर्थक्येनाऽप्रामाण्यापत्तिः स्यादेव, कालस्याऽऽग्नेयादिषु पौर्णमास्यादिपदाभिधेयेषूत्पत्तिवाक्यैरेव प्राप्तत्वादिति चेत्—न; एतद्वाक्याभावे हि उत्पत्तिवाक्येऽपि श्रुतः पौर्णमास्यमावस्याकालः फलसम्बन्धोत्तरकालं प्रयोगविधिकल्पनवेलायां कालस्य प्रयोगद्वारैवाऽङ्गत्वादुत्पत्तिवाक्ये प्रत्येकश्रुत्यनुरोधेन प्रत्येकमेव(२) 'अग्नयेऽनीकवते प्रातः पुरोडाश मष्टाकपालमि' त्यादावनीकवत्त्वादिप्रयोगवत् प्रयोगं कल्पयति। न च प्रत्येकप्रयोगकल्पने एकफलसाधनत्वानुपपत्तिः, प्रत्येकं प्रयुक्तानामप्याग्नेयादीनामनीकवत्त्यादिवदेव अपूर्वरूपेणैकक्षणवृत्तित्वेन फले साहित्योपपत्तेः। अत एव 'समे दर्शपूर्णमासाभ्यां यजेते' त्यनेन देशविधेः प्रयोगविधित्वात् षण्णां दैशिकसाहित्यावगमेऽपि एकस्मिन्नेव समे तिसृषु पौर्णमासीष्वमावास्यासु चैकैकप्रधानस्याऽन्वाधानप्रभृतिब्राह्मणतर्पणान्ताङ्गविशिष्टस्य प्रयोगोऽपि नाऽनुपपन्नः। न चैवमपि लाघवादेकस्यामेव पौर्णमास्यममावास्यायां च तत्तत्कालीनप्रयोगत्रयोपपत्तेः पौर्णमास्यादित्रयप्रसङ्गे प्रमाणाभावः। द्व्यहकालीनत्वप्रातःकालीनत्वयोरपि वचनान्तरप्रमितत्वेनैकस्यां तिथाविष्टित्रयकरणे तद्बाधप्रसङ्गात्।

---

१. पू. मी. १. २. ४. २. मै. सं. १. १०. १.

अतः 'पौर्णमास्यां पौर्णमास्या यजेते' त्येतद्वाक्यद्वयाभावे प्रत्येकमेव साङ्गानामाग्नेयादीनां करणापत्तिः ।

यत्तु वार्तिके एकफल (१) सम्बन्धानुरोधादेकस्यैव प्रयोगविधेः कल्पनम् । तत्र चोत्पत्तिकालानुरोधात्त्रिषु पौर्णमासीषु प्रधानत्रयम् । लाघवादेकस्यामेव वा तत् । एवममावास्यायामपि । अतश्च मासत्रयकालीनः पक्षद्वयमात्रकालीनो वा एक एव षण्णां प्रयोगः, तदन्तःपातीनि चाऽङ्गानि सर्वाण्यपि सकृदेव सवनीयपशवङ्गानामिव क्वचित्क्वचित् कर्तव्यानीत्येतद्वाक्याभावेऽनुष्ठानमुक्तम्; तत् राजसूयचातुर्मास्यादिष्वपि एकफलसाधनत्वेनैकप्रयोगत्वापत्तेरौत्पत्तिककालभेदेऽपि च तत्तत्काले प्रधानमात्रकरणेन तावत्कालीनप्रयोगैक्योपपत्तौ अङ्गानामपि सकृत्करणापत्तेरुपेक्षितम् । यथा च सवनीये नाऽङ्गावृत्तिः, तथा (२)आधाराग्निहोत्राधिकरणे वक्ष्यते । अत उत्पत्तिवाक्येषु नैरपेक्ष्येण कालस्य श्रवणात् प्रत्येकमेव प्रयोगाणामेतद्वाक्यद्वयाभावे कल्पनापत्तेरेतद्वाक्यद्वयसत्त्वे च त्रयाणां त्रयाणामेकप्रयोगसिद्धेः तत्सिद्धिरेव वाक्यद्वयप्रयोजनमिति नाऽऽनर्थक्यम् । तथा हि—

पौर्णमासीशब्दवाच्यानां त्रयाणां प्रधानानां स्वरूपेण प्राप्तानामपि प्रयोगविषयत्वेनाऽप्राप्तत्वात् पौर्णमासीकाले उपादेयत्वावगमात् पौर्णमासीकालविशिष्टप्रधानत्रयप्रयोगविधानावगतेः प्रयोगस्य च(३)एकादशाधिकरणन्यायेन साङ्गतावत्प्रधानविषयत्वादङ्गसाहित्यस्य प्रधानगतपरस्परसाहित्यस्य च विधेयविशेषणत्वेन विवक्षितत्वात् एकस्मिन् काले युगपत् साङ्गप्रधानत्रयकर्तव्यतासिद्धिः । एवममावास्यावाक्येऽपि द्रष्टव्यम् । एवं च सत्यपि

१.सम्बन्धादिति. क. पु. २. पू. मी. २. २४.
३. पू. मी. ११. १. २.

कालिकप्रयोगविधिभेदे देशवाक्येन षण्णामेकप्रयोगस्य विधानादेकस्मिन्नेव देशे षण्णां (१)साङ्गानां कर्तव्यताऽपि सिद्धा भवति । सर्वे हि देशकालादयः प्रयोगविशेषणत्वेनैवाऽन्वयं भजमानाः स्वसम्बन्धिनं प्रयोगं विनिगमनाविरहात् कल्पयन्ति । अतश्च तत्तद्वाक्ये कालादिविशिष्टप्रयोगविधिसिद्धिः ।

न च उत्पत्तिवाक्ये नैरपेक्ष्येण कालश्रवणात् फलसम्बन्धोत्तरकालं प्रयोगविधिकल्पने प्रत्येकमेव प्रयोगविधिकल्पनावगतेस्तदनुवादेनाऽत्र कालादिमात्रविधानोपपत्तेः प्रत्येकमेवाऽनुष्ठानप्रसङ्गेन एतद्वाक्यसत्त्वेऽपि नेष्टसिद्धिरिति वाच्यम् । प्रत्येकप्रयोगविधिकल्पनातः पूर्वमेवैतद्वाक्यप्रवृत्त्यङ्गीकारेणाऽत्रैव प्रयोगविध्युपपत्तेः । अन्यथा तादृशानुष्ठानस्यैतद्वाक्याभावेऽपि सिद्धावेतद्वाक्यानर्थक्यापत्तेः । न चैवं 'य इष्ट्या पशुना सोमेन वा यजेत, सोऽमावास्यायां पौर्णमास्यां वा यजेते'ति वाक्येन सर्वासां विकृतीष्टीनामपि पर्वकालविशिष्टैकप्रयोगविधानादेकप्रयोगतापत्तिः, तत्र (२)यत्तच्छब्दसमभिव्याहारात् तत्तद्विकृतिप्रयोगानुवादेन कालमात्रविधानावगतेः तत्तद्विकृतिवाक्येष्वेव प्रत्येकप्रयोगविधिकल्पनाया अभ्यनुज्ञानात् , तत्तद्विलक्षणफलसाधनानां तासामेकप्रयोगविधिविषयत्वानुपपत्तेश्च । अतश्च 'य इष्ट्ये'तिवाक्येनाऽवगतमपि तत्तद्विकृतिप्रयोगसाहित्यमनुवाद्यगतत्वादविवक्षितम् । प्रकृते तु (३)कालविशिष्टभावनारूपस्य प्रयोगस्यैव विधेयत्वाद्युक्तैवेष्टसिद्धिरिति वैषम्यम् ।

न चैवमुत्पत्तिवाक्ये कालश्रवणवैयर्थ्यापत्तिः, तस्य फलस-

---

१. यागानामिति. क पु.

२. यच्छब्दतच्छब्दसमभिव्याहारादिति. क. पु.

३. कालविशिष्टप्रयोगस्यैवेति. क. पु.

म्बन्धापादकफलवाक्यगतविद्वद्वाक्यादिगतपौर्णमास्यमावास्यादि-पदप्रसिद्ध्यर्थत्वेनाऽर्थवत्त्वात्। अत एवोपांशुयाजस्योत्पत्तिवाक्ये कालसम्बन्धाभावेऽपि 'तावब्रूतामग्नीषोमावाज्यस्यैव नावुपांशु पौर्णमास्यां यज' इति वाक्येन कालसम्बन्धात्फलसम्बन्धसिद्धिः। अतश्च कस्याऽपि वाक्यस्य वैयर्थ्याभावात्समुदायसिद्ध्यर्थं समुदाय्यनुवादके एव विद्वद्वाक्ये इति सिद्धम्।

सूत्रं तु—पौर्णमास्युपलक्षितयोर्विद्वद्वाक्ययोः, प्रकरणं प्रकृतानुवादः, रूपावचनात् कर्मान्तरविधेयनुपपत्तेरिति व्याख्येयम् ॥ ३ ॥

विशेषदर्शनाच्च सर्वेषां सर्वेषु ह्यप्रवृत्तिस्स्यात ॥ २—२—४ ॥

यदि चैतौ कर्मान्तरविधी स्याताम्, ततो यदि सर्वेषां समप्राधान्यम्, ततो विकृतिषु प्रधानस्याऽनतिदेशात् प्रयाजादीनामप्राप्तेः, सौर्ये 'प्रयाजे प्रयाजे कृष्णलं जुहोती'त्येन प्रयाजानुवादेन कृष्णलरूपविशेषविधिर्नोपपद्येत। यदि तु विद्वद्वाक्यविहितकर्मणोरेव प्रधान्यम् तत आग्नेयादीनामङ्गत्वेऽपि सौर्यस्यौषधद्रव्यकत्वेनाऽऽग्नेयविकृतित्वस्यैवाऽऽवश्यकत्वात् तद्धर्माणामबघातादीनामतिदेशेऽपि प्रयाजादीनामनङ्गत्वेनाऽऽग्नेयादिसमत्वात् सौर्यादिष्वप्राप्तेः प्रयाजानुवादेन कृष्णलविधेरनुपपत्तिः तदवस्थैव। एवमाग्नेययोरेव प्राधान्यपक्षेऽपि द्रव्यसादृश्येन सान्नाय्याविकारस्येव पशोः प्रयाजाङ्गत्वाभावात् तदनुवादेनैकादशत्वादिविध्यनुपपत्तिः। (१)अतो नैतौ कर्मान्तरविधी। अत्र च सू-

१. 'अतश्च' इति. क. पु.

त्रेऽन्वाचयवाचिचशब्दोपादानात् यागाष्टकप्राधान्यपक्षे नाऽयं-दोष इत्यव्यापकत्वादन्वाचयत्वं सूचितम् ॥ ४ ॥

गुणस्तु श्रुतिसंयोगात् ॥ २—२—५ ॥

नैतौ समुदायानुवादौ, विधायकत्वेनाऽर्थवत्त्वसम्भवे उक्त-प्रयोजनस्याऽपि समुदायानुवादत्वस्याऽनुपपत्तेः । अतः कर्म-विध्यपेक्षया प्रयोजनवत्तरत्वेनाऽन्यपरत्वाभावाद्भ्यासादेव कर्म-भेदासिद्धिः । एवञ्च 'पौर्णमासी'मित्येकवचनं कर्मैकत्वेनोपपद्यते । अन्यथा स्वाश्रयघटकवृत्तित्वसम्बन्धेन समुदायिबहुत्वलक्षणा स्यात् । अतोऽत्र तावत् कर्मावधिः । न च रूपाभावः, यदाग्ने-यादिवाक्यैस्तद्विधानोपपत्तेः । तथा हि—तत्रत्यपौर्णमास्यमावा-स्याशब्दाभ्यां विद्वद्वाक्यविहितकर्मोद्देशं कृत्वाऽऽग्नेयादिरूपविधा-नोपपत्तिः । एवञ्चैतेषु वाक्येष्वश्रुतयागकल्पनं विशिष्टविधिगौ-रवं च नैवाश्रितं भवति । न चैवं वाक्यभेदः, अग्नीषोमीयसा-न्नाय्यादिवाक्येषु तावदेकैकस्यैवोद्देशेन तन्निमित्तकवाक्यभेदस्य तावदप्रसक्तेः । आग्नेयादिवाक्येऽपि पौर्णमास्यमावास्याशब्दल-क्षणया 'अर्धमन्तर्वेदि मिनोती'तिवत्प्रकृतप्रधानयागस्यैवोद्देशात् न तन्निमित्तो वाक्यभेदः । यदि तु (४)एतस्मिन्नपि पक्षे प्रया-जादिसाधारण्येन सर्वेषां प्राधान्यमुच्येत, ततो रूपसाकाङ्क्षप्र-कृतयागत्वस्यैव लक्ष्यतावच्छेदकत्वेनोद्देश्यतावच्छेदकत्वोपपत्तेर्न वाक्यभेदः ।

न चैवमपि द्रव्यदेवतारूपविधेयानेकत्वनिमित्तो वाक्यभेद-स्तदवस्थ एवेति वाच्यम् । तद्धितान्तपदेनैकेनैव देवताविशिष्टद्र-व्यविशेषवाचिना विशिष्टस्यैकस्यैव प्राप्तभावनानुवादेन विधानो-

१. अस्मिन्नपीति. ख. पु

पपत्तेः । अत एव (१)गुणाधिकरणे वक्ष्यमाणन्यायेनाऽष्टाकपालपदस्य तात्पर्यग्राहकत्वान्न तदंशे तद्भिन्नपदोपात्ततास्याशङ्कनीया । अतश्चैकपदोपादानाद्वैशिष्ट्यबोधोपपत्तेर्न वाक्यभेदः । यत्र तु 'पञ्चदशान्याज्यानी'त्यादौ भिन्नपदोपादानम्, तत्र भावनान्वयात्पूर्वं परस्परवैशिष्ट्याप्रतीतेः प्राप्तभावनानुवादेनोभयविधौ युक्तो वाक्यभेदः; प्रकृते त्वेकपदत्वेन भावनान्वयात्पूर्वमेव द्रव्यदेवतावैशिष्ट्यप्रतीतेः, प्रत्युत तदनङ्गीकारे 'साऽस्य देवते'ति द्रव्यसम्बन्धाधिकारविहितदेवतातद्धितानुपपत्तेर्भावनान्वयात्पूर्वमेव परस्परवैशिष्ट्यस्याऽऽवश्यकत्वात् प्राप्तभावनानुवादेनाऽपि विशिष्टविध्युपपत्तेर्न वाक्यभेदः । अत एव न (२)पञ्चैकत्वाधिकरणपूर्वपक्षन्यायेन देवताया अविवक्षा, तद्धिह प्राथमिकभावनान्वयस्य तद्धितयङ्गभयेनाऽव्युत्पन्नत्वात् ।

यत्त्वत्र भवदेवेन पुरोडाशसान्नाय्यादेः संस्कारविध्यन्यथानुपपत्त्यैव प्राप्तत्वादाग्नेयादिवाक्यैर्देवतामात्रविधानात् न वाक्यभेद इति परिहृतम्, तत् पुरोडाशादेः कथञ्चित् प्राप्तिसम्भवेऽपि अष्टत्वादिप्राप्तेरभावात्, तद्विधाने वाक्यभेदापत्तेरेकैकस्मिन्नपि च द्रव्ये सर्वासां देवतानां विकल्पेन प्राप्त्यापत्तेरुपेक्षितम् । तस्मादुक्तप्रकारेणैव वाक्यभेदपरिहाराद्रूपलाभोपपत्तेः कर्मान्तरविधिरेवाऽयम् ।

अस्मिंश्च पक्षे विद्वद्वाक्यविहितयोरेव कर्मणोः प्राधान्यात्, प्रयाजादीनां तदङ्गत्वात्, सौर्यादीनां चाऽऽग्नेयवाक्यविहितयागाभावेन विद्वद्वाक्यविहितकर्मविकृतित्वादतिदेशेन प्रयाजप्राप्त्युपपत्तेर्युक्तस्तदनुवादेन कृष्णलविधिः । यदि त्वस्मिन्नपि पक्षे पूर्ववत्समप्राधान्याङ्गीकरणम्, ततः कृष्ण-

१. पू. मी. २. ३. ९. २. पू. मी. ४. १. ५.

लविशिष्टप्रयाजान्तरस्यैव सौर्ययागाङ्गतया विध्यङ्गीकारेण दार्शपौर्णमासिकप्रयाजानुवादेन कृष्णलविध्यङ्गीकारेण वा 'यत्र नित्यानुवादवचनानि स्यु' रिति न्यायेन परिहर्तव्यम्। अतः कथं समुदायानुवादकत्वमिति चेत्—

चोदना वा गुणानां युगपच्छास्त्राच्चोदिते हि तदर्थत्वात्तस्य तस्योपदिश्येत ॥ २-२-६ ॥

नाऽऽग्नेयादिवाक्ये रूपविधिस्सम्भवति, प्राप्तकर्मानुवादेन द्रव्यदेवतारूपानेकार्थविधाने वाक्यभेदात्। यत्र ह्यप्राप्ता भावनाऽऽनेककारकविशिष्टा विधीयते, तत्र(१)श्रौतविधेर्विशिष्टभावनाविधान एव व्यापाराद्विशेषणानाञ्च विशिष्टविध्यन्यथानुपपत्तिकल्पितविशेषणविधिभिरेव विधानसिद्धेः श्रौतस्य विधेस्तत्र व्यापाराभावात् न विधेयानेकत्वनिमित्तो वाक्यभेदः। न च तत्राऽपि विशिष्टज्ञानस्य विशेषणज्ञानाधीत्वाद्विशेषणविध्युत्तरकालप्रवृत्तिकस्य विशिष्टविधेर्न विशेषणविधिकल्पकत्वसम्भवः, विशिष्टज्ञानस्य विशेषणज्ञानाधीनत्वेऽपि विशिष्टकर्तव्यतारूपस्य तद्विधेः विशेषणकर्तव्यताज्ञानाधीनज्ञानविषयत्वाभावात्, विशिष्टज्ञानापेक्षितविशेषणज्ञानस्य च विशिष्टविधिवेलायां सोमादिपदैरेव जननोपपत्तेः। अतश्च श्रुतस्य विधेस्तत्तत्पदोपनीतविशेषणयुक्तविषयविधान एव व्यापारादार्थिकविशेषणविधिवाचकपदकल्पनव्यापारकत्वेऽपि तद्विधानव्यापारकत्वाभावान्नाऽनेकविधितात्पर्यकत्वकृतो वाक्यभेदः।

प्रकृते तु विशेष्यभूताया भावनाया विद्वद्वाक्यादेव प्राप्तत्वाद्विधेस्तद्विधितात्पर्यविषयत्वायोगादा(२)नर्थक्यतदङ्गन्यायेन

१. श्रौतस्य विधेरिति. क० पु० २. पू. मी. ३ १. ९

विशेषण एवाऽवतारात् तत्र च विशेषणानेकत्वे तेषां परस्परविशेषणविशेष्यभावे नियामकाभावेन प्रत्येकमेव विधितात्पर्यावगतेः सकृच्छ्रुतस्य चाऽनेकत्र तात्पर्यकल्पने आवृत्तिमन्तरेण तदयोगादावृत्तिलक्षणो वाक्यभेदः । यद्यपि च विशिष्टविधिस्थले भावनाया अनेकान्वयित्वस्वाभाव्यादनेकेषां विशेषणानामन्वयेऽपि नाऽऽवृत्तिः, तथाऽपि विधेः विशिष्टविधावपि विशेष्यरूपैकविधायकतया कृत्स्नस्य नानेकविधिस्वाभाव्यम्, तस्मादिहाऽनेकविधाने वाक्यभेदो दुष्परिहर एव, आवृत्तिप्रसङ्गात् ।

अत एव प्राप्तायामपि मुख्यविशेष्यभूतायां भावनायां यत्र विशेषणानामपि व्युत्पत्तिवशेन परस्परवैशिष्ट्यावगमः, तत्र भवत्येवानेकविशेषणविशिष्टस्याऽप्येकस्य विशेष्यस्य प्राप्तानुवादेन विधिः, यथा 'पशुना यजेत' (१)'धेनुर्दक्षिणे' त्यादौ जातिसंख्यादिविशिष्टस्यैकस्य कारकस्य,-यथा चैककक्रयवादिमते (२)"अजया क्रीणाती"त्यादौ । (३)तत्र हि तृतीयोपात्ते करणत्वे पार्ष्टिकान्वयलभ्यद्रव्यपरिच्छेदद्वारा समानाभिधानश्रुत्या संख्यायाः, पदश्रुत्या च जातेरन्वयो व्युत्पत्तिसिद्ध एव । अतश्च तत्रोभयकारकविशिष्टद्रव्यगतैककरणत्वविधानान्न वाक्यभेदः । यद्यपि जातिसंख्याद्वयवृत्तिकरणत्वद्वयस्यैव तृतीययोपादानमित्याश्रीयते, तथाऽपि द्वयोः करणत्वयोरेकशब्दोपादानेन वाक्यभेदो(४) ऽवगन्तव्यः ।

एवं मूलानुयायिमते षष्ठ्या अपि भावनान्वयनियमाभावात् षष्ठ्यन्तस्य कारकविशेषणत्वोपपत्तेः प्राप्तभावनानुवादेनाऽपि विशिष्टविधिर्द्रष्टव्यः । यथा-'तस्य द्वादशशतं दक्षिणे' त्यत्र प्रा-

१. तै. सं. १. ८. १
२. तै. सं. ६. १. १०.
३. अत्र हीति. क. पु.
४. अधिगन्तव्य इति. क. पु.

प्राप्तदक्षिणानुवादेनाऽपि तच्छब्दोपात्तगोविशिष्टसंख्याविधिः । वस्तुतस्तु प्राप्तदक्षिणानुवादेन गोविशिष्टसंख्याविधावपि समुच्चिताश्वादेरपि विधेयत्वात् तत्रोभयविशिष्टदक्षिणाविधानमेव स्वीकर्तव्यम् । अत एव षष्ठीस्थलेऽपि निमित्तवत्प्रधानभूतभावनान्वये सम्भवति व्युत्पत्त्यन्तरकल्पनापादकोऽन्वयो नाऽङ्गीक्रियत एव । अतस्तत्राऽपि प्राप्तकर्मानुवादेनाऽनेकविधानेऽस्त्येव वाक्यभेदः ।

यत्त्वत्र पार्थसारथिना(१) 'अग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपे"दित्यादौ प्राप्तद्रव्यानुवादेनाऽग्निर्दाता च विधीयते । न च तत्र वाक्यभेदः, अग्निदातृत्वयोः परस्परविशेषणविशेष्यभावस्य मन्त्रार्थवादादौ प्रसिद्धत्वेन दातृत्वगुणविशिष्टस्याऽग्नेः प्राप्तकर्मानुवादेऽपि द्रव्योद्देशेन विधातुं शक्यत्वादित्युक्तम्; तत् अन्यपरमन्त्रार्थवादादिकृतप्रसिध्यवलम्बेनाऽपि वैशिष्ट्योपपत्तौ सुतरां द्रव्यगुणयोर्वास्तविकलोकप्रसिद्धविशेषणविशेष्यभावेन वैशिष्ट्योपपत्तेः स्तोत्रानुवादेन संख्याविशिष्टाज्यविधाने वाक्यभेदानापत्तेरुपेक्षितम् ।

(२)यदप्युक्तं तन्त्ररत्ने दात्रादिपदानां कृदन्तानां सन्निहितद्रव्यवाचकत्वात् दातृपदेनैव दातृत्वगुणविशिष्टाग्निविधानम्, अग्निपदं चाऽऽमिक्षापदवत्तात्पर्यग्राहकं(३) इति, तत् स्वयमेव शास्त्रदीपिकाया(४)माग्नेय्यधिकरणे यौगिकानां पदानां सन्निहितमात्रवाचकत्वस्य निराकृतत्वादयुक्तमेव । न च आग्नेयीपदस्याऽकृदन्तस्य सन्निहितासन्निहितसाधारणद्रव्यमात्रवाचित्वेऽपि दातृशब्दस्य कृदन्तत्वात् सन्निहितमात्रवाचित्वोपपत्तिः;

१. तै. सं. २. ३. २. २. यदपि तन्त्ररत्न इति. क. पु.
३. इति परिहृतमिति. क. पु. ४. पू. मी. ३. २. ८.

दातृपदस्य सन्निहितवाचित्वे सर्वनामार्थविहिततद्धितान्ताग्नेयीपदस्य सुतरां तदापत्तिः, अतः तत्रापि प्राप्तकर्मानुवादेनाऽनेकविधानादस्त्येव वाक्यभेदः। अत एव तत्र द्रव्यदेवताविशिष्टभावनाविधिपक्ष एवाश्रयिष्यते। यानि च तत्पक्षे दूषणानि तानि तत्रैवोपन्यस्य परिहरिष्यामः।

तस्मात्सिद्धमव्युत्पन्नपरस्परविशेषणविशेष्यभावानां विशेषणानां प्राप्तभावनानुवादेन विधाने वाक्यभेद इति।

यत्तु प्रकृतेऽपि आग्नेय इति तद्धितवृत्तिविधानात् द्रव्यदेवतयोर्विशेषणविशेष्यभावोऽव्युत्पन्न एवेत्युक्तम्; तत्रेदमुत्तरं वाच्यम्—यत्र तद्धितवृत्तौ समासवृत्तौ वा कारकतातिरिक्तसम्बन्धेन वृत्तिस्तत्राऽकृत्वापि भावनासम्बन्धं प्रथमतोऽन्योन्यसम्बन्धेन वैशिष्ट्य उच्यमानेऽपि न वाक्यभेदः। अत एव(१) 'लोहितोष्णीषा लोहितवसना ऋत्विजः प्रचरन्ति', 'हिरण्यमालिनः प्रचरन्ती'त्यादौ प्राप्तप्रचारानुवादेन ऋत्विग्गतलौहित्यविशिष्टोष्णीषविधिः। एतदभिप्रायेणैव च(२) चित्राधिकरणे 'यदि पञ्च दशाज्यानीति समासः स्यात् ततो न वाक्यभेदो भवे'दिति पार्थसारथिनोक्तम्।

यत्र तु कारकतासम्बन्धेन वृत्तिः, यथा—आग्नेय इत्यादौ देवतात्वेन, तदपि हि सम्प्रदानकारकं कर्मकारकं वेत्यग्निमाधिकरणे वक्ष्यते, तत्र प्राथमिकक्रियासम्बन्धात् प्रागन्यसम्बन्धाभ्युपगमे कारकत्वव्याघातापत्तेः प्रथमतः क्रियासम्बन्ध एवाभ्युपगम्यते, पश्चात्तु द्रव्यसम्बन्धः, एकहायनीसम्बन्धवत्। युक्तश्चैतत्। यथैवाऽऽरुण्यस्य सत्यप्येकहायनीसामानाधिकरण्ये टाबन्तत्वे च कारकश्रुत्या क्रियासम्बन्धमेव

१. का. श्रौ. २२. ३. १५. २. पू. मी. १. ४. ३.

प्रथमतोऽभ्युपगम्य पाश्चात्यसम्बन्धेनैव सामानाधिकरण्यादेर्निर्वाह्यते, न तु द्रव्यसम्बन्धमेव प्रथमतोऽभ्युपगम्य परम्परासम्बन्धेन कारकत्वम्; तथा प्रकृतेऽपि कारकत्वाविशेषात् प्रथमतः क्रियासम्बन्धः पश्चादेव द्रव्यसम्बन्धः, तदभिप्रायिकैव च वृत्तिः। न च सम्बन्धज्ञानं विना वृत्त्यनुपपत्तिः, अरुणयेत्यादौ टाबादाविव द्रव्यासम्बन्धित्वानिश्चयस्यैव तद्बीजत्वात्। अतश्च सम्बन्धाज्ञानवदसम्बन्धस्याऽप्यज्ञानात् वृत्त्युपपत्तेः द्रव्यवद् देवताकारकस्यापि प्रथमतः क्रियासम्बन्धसिद्धिः। अतश्च "पञ्चदशान्याज्यानी"तिवदेवोभयोः क्रियासम्बन्धाद्वैशिष्ट्यानुपपत्तेः प्राप्तभावनानुवादेनानेकगुणविधाने वाक्यभेदो दुरुद्धर एव। अत आग्नेयादिवाक्ये द्रव्यदेवताविशिष्टयागान्तरस्यैव विधानात् विद्वद्वाक्ये रूपाभावस्तदवस्थ एव।

नन्वेवमपि द्रव्यदेवताविशिष्टभावनामात्रविधिरेवाऽऽग्नेयादिवाक्येष्वस्तु, न तु स्वतन्त्रयागकल्पनम्, गौरवात्, अभ्युदितेष्टौ भावनान्तराविधिवत्। तस्याश्चावच्छेदकीभूतयागापेक्षायां तद्देवेन्द्रियकामहोमवच्च विद्वद्वाक्यविहितौ यागौ यथायोगं पौर्णमास्यमावास्यापदोपनीतौ सम्बध्येते, अत एव विद्वद्वाक्येऽपि प्राप्तभावनानुवादेन यागमात्रविधिः, न तु यागविशिष्टभावनाविधिरिति लाघवमिति चेन्न; तथा सति "तावब्रूतामग्नीषोमाबाज्यस्यै"वेत्यादिवाक्यस्य वैयर्थ्यापत्तेः। इदं ह्युपांशुयाजस्यान्तरालविधिवशेन सम्भवत्प्राप्तिकपौर्णमासीकालसम्बन्धविधानार्थं सत्तस्य फलसम्बन्धार्थमित्युत्तराधिकरणे वक्ष्यते। विद्वद्वाक्यविहितकर्मद्वयाङ्गीकारे च तस्यैव निर्ज्ञातनामकत्वेन फलसम्बन्धापत्तेः उपांशुयाजे कालविधिरनर्थक एवेति तस्य कर्मविधायकतायाश्चाऽप्रसिद्धेः दुर्घटैवाऽऽग्नेयादिवाक्यविहितभावनावच्छेदकतोक्तिः।

वस्तुतस्तु अमावास्याव्यावर्तनफलकत्वेनाऽपि तत्सार्थक्योपपत्तेः पूर्वोक्तविधयाऽन्यपरत्वाद्विधिकल्पकाभावेनाभ्यासस्वरूपविघटनेनैवाऽयं पूर्वपक्षो निराकर्तव्यः ।

एतेन सत्यप्याग्नेयादिवाक्येषु यागान्तरविधाने विद्वद्वाक्यविहितकर्मणोरप्येकप्रयोगविधिपरिग्रहेण सान्नाय्यवदाग्नेयादियागैः सह तन्त्रेणाऽनुष्ठानोपपत्तेः तदीयद्रव्यदेवतायाः प्रसङ्गेनोपकारकत्वोपपत्तेरुपपन्नं रूपमिति विधित्वमित्यप्यपास्तम्, विद्वद्वाक्ये विधेरेवाऽनिश्चयेन कर्मविध्यनिश्चयात्, प्रत्युत यच्छब्दोपबन्धत्वेनाऽनुवादत्वस्यैव निश्चयाच्च । अत एव समुदायानुवादकत्वापेक्षया प्रयोजनवत्तरमपि विधित्वं नैवाङ्गीकृतम् । किञ्चाऽस्मिन् पक्ष आग्नेयादिवाक्यस्थपौर्णमास्यमावास्याशब्दयोः सप्तम्यन्तयोः लाक्षणिकत्वमपि निष्प्रयोजनकमापद्येत । विद्वद्वाक्यस्थ 'पौर्णमासी' मित्याद्येकवचनञ्चोपक्रमस्थयच्छब्दानुरोधेन लक्षणया नीयमानं न दुष्यति । तस्मात् समुदायानुवादौ ।

सूत्रं तु-कर्मचोदना वा स्यात् आग्नेयादिवाक्ये, तथा सति गुणानां युगपदेकेन शास्त्रेण विधानं शक्यं कर्तुम्, प्राप्ते तु कर्मणि गुणमात्रविषयत्वात् विधेः तस्यतस्योपदेशे वाक्यभेदापत्तिः, इति व्याख्येयम् ॥

व्यपदेशश्च तद्वत ॥ २-२-७ ॥ (सि)

"उग्राणि वा एतानि हवींष्यमावास्यायां सम्भ्रियन्ते आग्नेयं प्रथममैन्द्रे उत्तरे" इत्यत्र त्रयाणामेव तावदग्रत्वापरपर्यायप्राधान्यव्यपदेशो भवत्पक्षे न युज्यते । किञ्च द्वितीये पक्षे विद्वद्वाक्यविहिते कर्मणि आग्नेयादिहविषां त्रिकल्पापत्तेः सम्भरणपदवाच्यं साहित्यं प्रथमादिपदवाच्यश्च क्रमो न युज्येत । एतदन्यथानुपपत्त्यैव समुच्चयविध्यङ्गीकारे त्वतिगौरवम् ॥

लिङ्गदर्शनाच्च ॥ २-२-८ ॥

"चतुर्दश पौर्णमास्यामाहुतयो हूयन्ते, त्रयोदशाऽमावास्यायां" मित्याहवनीयगतषट्कारादिपरिगणनं प्रथमभवत्पक्षे पौर्णमास्यां पञ्चदशत्वापत्तेरमावास्यायां चतुर्दशत्वापत्तेः द्वितीयपक्षे चोभयत्र द्वादशत्वापत्तेर्नोपपद्येत । अस्मन्मते तु पञ्च प्रयाजाः, द्वावाज्यभागौ, स्विष्टकृत्, त्रयोऽनूयाजाः, पौर्णमास्यां प्रधानाहुतित्रयम्, अमावास्यायां सान्नाय्यस्य सहानुष्ठानात् प्रधानाहुतिद्वयमिति चतुर्दशत्वत्रयोदशत्वानुवादो नाऽनुपन्नः । यद्यपि चाऽसोमयाजिनो ऽग्नीषोमीयाभावादस्मन्मतेपि चतुर्दशत्वसङ्ख्याऽनुपपन्नैव, तथाऽपि सोमयाजिन एव तावत्सम्भवतीति न विरोधः । त्रयोदशत्वसंख्या त्वसन्नयतोऽप्यैन्द्राग्नविधानादुपपन्नैव । तस्मात्समुदायानुवादावेतौ, न कर्मान्तरविधी, इति सिद्धम् ॥ ८ ॥

इति तृतीयं पौर्णमास्यधिकरणम् ॥ ३ ॥

अथ चतुर्थमुपांशुयाजाधिकरणम् ॥ ४ ॥

पौर्णमासीवदुपांशुयाजस्स्यात् ॥ २-२-९ ॥ (पू-)

दर्शपूर्णमासयोः "जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशावुपांशुयाजमन्तरा यजति, विष्णुरुपांशु यष्टव्योऽजामित्वाय, प्रजापतिरुपांशु यष्टव्योऽजामित्वाय, अग्नीषोवुपांशु यष्टव्यावजामित्वाये"ति श्रुतम् । तैत्तिरीयशाखायां तु (१)उपांशुयाजमन्तरा यजत्यजामित्वाय' इत्यपि समाम्नातम् । तत्र सन्दे-

१. तै. सं. २. ६. ६.

दः—किं विष्ण्वादिवाक्येषु तत्तद्देवताविशिष्टयागविधिरन्तराल-वाक्ये च तेषां त्रयाणां समुदायार्थमनुवादः, अथ वा तत्रैवाऽन्तरा-लकालोपांशुत्वविशिष्टयागविधिः, इतरे तस्यैवार्थवादाः ? इति ।

अत्र च समुदायानुवादत्वस्याऽपवादादनन्तरसङ्गतिस्तावत् स्पष्टा । पूर्वपक्षे गुणादभ्यासाद्वा कर्मभेदः, सिद्धान्ते नेत्यभिधा-नाच्च पादाध्यायसङ्गतिरपि द्रष्टव्या ।

तत्र तव्यप्रत्ययस्य(१) 'स्वाध्यायोऽध्येतव्य' इतिवन्निस्सन्देहं विधित्वात् 'यजती'त्यस्य लट्लेट्साधारणत्वेन सन्दिग्धत्वादुभ-यत्र तुल्यत्वेऽपि वा(२) 'भूयस्त्वेनोभयश्रुती'त्यनेन न्यायेन यत्र यागपरिचायकदेवतादिमत्ता तत्रैव च यागविधिरिति निश्चयात् विष्ण्वादिवाक्येष्वेव कर्मविधानम् ।

न चैवं विष्ण्वादिदेवतात्रयविशिष्टैककर्मविधाने तव्य-प्रत्ययान्तरपुनःश्रुतिवैयर्थ्यापत्तेः विनिगमनाविरहेण सर्वेषां विधायकत्वावसायात् विहितविधानायोगाच्च कर्मभेदे सति वैश्वानरवाक्यवदुपक्रमोपसंहारैक्यबलगम्यैकवाक्यत्वस्य विधे-यभेदेन भङ्गापत्तिरिति वाच्यम्, तत्र हि जातेष्ट्यैवोपक्रमात् तयैव चोपसंहाराद्युक्तैकवाक्यता, प्रकृते तु पुरोडाशनैरन्तर्यापा-दितालस्यापरपर्यायजामित्वेनोपक्रमादजामित्वेन चोपसंहारादु-पक्रमोपसंहारैक्याभावेनैकवाक्यत्वाप्रतीतेः ।

यद्यपि च दोषरूपस्य जामित्वस्य तदपनायककर्मस्तुत्यर्थत्वेनैव सङ्कीर्तितत्वात् जामित्वाजामित्वयोरेकविषयत्वमुच्यते, तथाप्य-जामित्वस्य प्रत्येकमुपसंहारात् तदनुरोधेनोपक्रमस्यापि प्रत्येकम-नुषङ्गावगतेः भिन्नवाक्यत्वोपपत्तिः । न ह्यन्यथा प्रत्येकमुपसंहारः कथमपि युज्यते; जातेष्टिवत् युगपदेवोपसंहियेत । अतो भिन्न-

१. तै. आ. २. १५. २. पू. मी. सू. ३. ३. १०.

७० जागदीशीपञ्चलक्षणी सिंहव्याघ्रलक्षणं च । श्रीजगदीशतर्कालङ्कारकृतम् । न्यायाचार्य प० शिवदत्तमिश्र विरचित गंगानिर्झरिणीव्याख्यया टिप्पण्यादिविभूषितं च । [न्यायविं० ९] रु० ०—८

७१ (१) ब्रह्मसूत्रशाङ्करभाष्यम् । चतुःसूत्र्यन्त पूर्णानन्दीय व्याख्या सहितया श्रीगोविन्दानन्द प्रणीतया रत्नप्रभया समन्वितम् । द्वितीयाध्यायस्य द्वितीयपादान्तो प्रथमोभागः । तविभागे ९] रु० २—८

७१ [२ ब्रह्मसूत्रशाङ्कर तम् । द्वितीयाध्या प्रभया समन्वि- द्वितीयोभागः । न्त वि० ९] रु०२—८

७२ [१]-सिद्धान्तशिरो ाध्यायः" वास- नाभाष्य सहितः ाख्यिकृतटिप्पणी सहितः । ० वि० ४] रु० २—०

७२-[२]-सिद्धान्तशिरो "गोलाध्यायः" वासनाभाष्य सहि देवशास्त्रि कृत टिप्पणी सहितः । ० वि० ४] रु० २—०

७३ काकचण्डीश्वरकलपत ाम् । पण्डित बटुकनाथ शर्म्मा एम प्रस्तावनया सनाथीकृतम् । ाभागे १] रु० ०—८

७४ किरातार्जुनीयम् । श्र ाथसूरिकृतया घण्टापथसमाख्यव्याख्यया समलङ्कृतम् । ाऽऽख्यव्या- ० १०] रु० ०—१२

७५ चन्द्रालोकः । पीयूष धान प्रद्योतनभट्टाचार्य सङ्कलितः । सांहित्या सम्भूष्य सम्पादितः । मेश्वरामि- रदागम' टीकया ां भूमिकादिभिः [अलङ्कार वि० ३] रु० ०—१०

७६ किरातार्जुनीयम् । श्रीमत्कविकुलचूडामणिभारविविरचितम् । मल्लिनाथसूरिकृतया घण्टापथसमाख्यया तथा पं० श्रीकनकलालशर्मणा कृतया भावार्थदीपिनीव्याख्यया समलङ्कृतम् । [सर्गत्रयमात्रम्] [काव्य वि० ११] रु० ०—६

७७ शक्तिवादः, श्रीगदाधरभट्टाचार्यप्रणीतः, पण्डितप्रवरश्रीहरिनाथतर्कसिद्धान्तभट्टाचार्यविरचितविवृतिसहितः । [न्यायविभागे १०] रु० ३—०

७८ माथुरोपञ्चलक्ष्णी । पं श्रीउमानाथर्ज्यालकृतव्याख्या सहिता तथा माथुरीसिंहव्याघ्रलक्षणम् । पं० श्रीहरिरामशुक्ल विरचितया व्याख्यया सहितं तथा पं० श्रीहरिहरशास्त्रि सङ्कलित माथुरोपञ्चलक्षणी क्रोडपत्रेण च । [न्याय वि० ११] रु० ०—६

७९ रसाध्यायः । टीकया संवलितः । [आयुर्वेदशास्त्र वि० २] रु० ०—१०

८० (१) पाणिनिव्याकरणे वादरत्नम् । न्यायव्याकरणाचार्य मीमांसक शिरोमणि पं० सूर्यनारायणशुक्लेन विरचितम् । (तत्र च न्यास परिष्कारपरिशिष्ट भेदेन प्रकरण त्रयम् यत्र पञ्चन्यून सार्धशतसूत्रेषु १४९ महताटोपेन न्यासाविचारताः तत्र प्रथमं प्रकरणं मुद्रितं प्रथमो भागः । [व्या० वि १०] रु० १—८

८० (२) पाणिनीव्याकरणे वादरत्नम् । द्वितीयोभागः [न्या० वि०] रु० १—४

८१ गणितकौमुदी । [हिन्दीभाषाटीकासहिता] प्रथमापरीक्षापाठ्यनिर्द्धारितगणितसंग्रहपुस्तकम् । [गणितविभागे १] रु० ०—६

८२ छन्दः कौमुदी । [हिन्दीभाषाटीकासहिता] प्रथमापरीक्षापाठ्यनिर्द्धारितछन्दःसंग्रहपुस्तकम् । [छन्दोविभागे ३] रु० ०—६

८३ योगदर्शनम् । महर्षिप्रवरपतञ्जलिप्रणीतम् । तत्र (१) भोजवृत्तिः, [२] भावागणेशवृत्तिः, [३] नागोजीभट्टवृत्तिः, [४] मणिप्रभा, [५] योगचन्द्रिका, [६] योगसुधाकराख्य टीका षट्कसमेतम् । सटिप्पण । [योग० विभागे १] रु० २—८

८४-[१] रघुवंशमहाकाव्यम् । श्रीकालिदासविरचितम् । म० म० मल्लिनाथकृत सञ्जीविनीटीका तथा पं० ब्रह्मशङ्करमिश्रकृतपरीक्षोपयोगि सुधाऽऽख्यव्याख्या सहितः । १ से ४ सर्गैः । मूल्यम् रु० १-४-० तथा १ से ९ सर्गैः । रु० १—८

८४-[२] रघुवंशमहाकाव्यम् । श्रीकालिदासविरचितम् । म० म० मल्लिनाथ कृत सञ्जीविनीटीका पं० श्रीसुदामामिश्रकृत परीक्षोपयोगि सुधाऽऽख्य व्याख्यया सहितः । ६ से १० सर्ग । (काव्य वि० १२) रु० १—८

८५ योगदर्शनम् । पं० श्रीबलदेवमिश्रकृत योगसूत्रप्रदीपिकाख्यव्याख्यया सहितम् । सटिप्पण । [योग वि० २] १—०

८६ काव्यमीमांसा । राजशेखरविरचिता । साहित्याचार्य पं० श्रीनारायणशास्त्रि खिस्ते कृत काव्यमीमांसा—चन्द्रिका टीका सहित [१ से ९ अध्याय] प्रथमो भागः । [काव्यविभागे १३] रु० ०—८

८७ नागानन्दनाटकम् । श्रीहर्षदेवप्रणीतम् । काशीविश्वविद्यालयाध्यापकेन एम० ए० साहित्याचार्येति पदवी विभूषितेन पण्डित श्री बलदेव उपाध्यायेन स्वप्रणीतया भावार्थदीपिकाख्यया व्याख्यया समलङ्कृत्य बृहत् भूमिका हिन्दीभाषानुवादादिभिः सनाथीकृत्य सम्पादितम् । [नाटक विभागे १] रु० १—४

८८ मेघदूतकाव्यम् । महाकवि श्रीकालीदास विरचितम् । मल्लिनाथकृत सञ्जीविन्या, चारित्रवर्द्धनाचार्य विरचित चारित्रवर्द्धिन्या तथा साहित्याचार्य पं० श्री नारायण शास्त्री खिस्तेकृत भावप्रबोधिनीव्याख्या टिप्पण्या च सहितम् । [काव्य० १४] रु० ०—८

८९ जागदीशीव्यधिकरणम् । न्यायाचार्यश्रीशिवदत्तमिश्रविरचित गंगाख्यव्याख्या टिप्पणी सहितम् । (न्यायविभागे १२) रु० २—०

९० काव्यकल्पलतावृत्तिः । श्रीअमरचन्द्रयतिगिमता अरिसिंहकृतसूत्रसंहिता । (अलङ्कारविभागे ४) रु० १—४

९१ वैयाकरणसिद्धान्तचन्द्रिका । श्रीरामाश्रमप्रणीता । श्रीसदानन्दकृत-सुबोधिन्या, श्रीलोकेशकरकृत-तत्त्वदीपिकाव्याख्यया च सहिता । पं० श्रीनवकिशोरशास्त्रिणानिर्मितया चक्रधराख्य टिप्पण्या च संवलिता उत्तरार्द्धे । (व्या० वि० ११) रु० २—८

९२ त्रिपुरारहस्यम् (महात्म्यखण्डम्) साङ्ख्ययोगशास्त्राचार्य श्रीमुकुन्दलाल शास्त्रिणा संशोधितम् । साहित्याचार्य खिस्ते—इत्युपाख्य पं० श्रीनारायणशास्त्रिणा निबद्धाभ्यां भूमिकाऽध्यायानुक्रमणिकाभ्यां च सहितम् । (पुराणेतिहास वि०१) रु० ७—०

९३ आपस्तम्बधर्मसूत्रम् । श्रीमद्धरदत्तमिश्र विरचितया उज्ज्वलाख्यया वृत्त्या संवलितम् । (कर्मकाण्डविभागे ७) रु० ४—०

९४ अवच्छेदकत्वनिरुक्तिः । श्रीजगदीशतर्कालङ्कारकृताः । न्यायाचार्य श्रीशिवदत्तमिश्रविरचित गंगाख्यव्याख्या टिप्पणी सहितः । (न्याय वि० १३) रु० १—४

९५ संस्कारदीपकः । गणेशपूजादिग्रहयागान्त-पूर्वाङ्ग-निरूपणात्मकः प्रथमो भागः । म० म० पण्डित श्रीनित्यानन्दपन्त पर्वतीयविरचितः । (कर्मकाण्ड वि० ८) रु० २—०

९६ वर्षकृत्यदीपकः । कालनिर्णयव्रतोद्यापनसहितः । म० म० प० नित्यानन्दपन्त पर्वतीय विरचितः । (कर्मकाण्ड वि० ९) रु० ३—८

९७ श्रौतसूत्रम् । (सामवेदीयं) श्रीमन्महर्षि-लाट्यायनप्रणीत अग्निष्टोमान्तम् । सरलावृत्तिसहितम् । (कर्मकाण्ड वि० १०) रु० २—०

९८ नलचम्पूः अथवा दमयन्तीकथा । महाकविश्रीत्रिविक्रमभट्टविरचिता । विषमपदप्रकाशाख्यव्याख्यया सहिता । भावबोधिनी टिप्पणी सहिता । (का० वि०१५) रु० १-४